एन्द्र॑स्य कु॒क्षा प॑वते म॒दिन्त॑म॒ ऊर्जं॒ वसा॑नः॒ श्रव॑से सु॒म॒ङ्गल॑: । प्र॒त्यङ्स विश्वा॒ भु॒व॑ना॒भि प॑प्रथे॒ क्रीळ॒न्हरि॒रत्य॑: स्यन्दते॒ वृषा॑ ॥

The Mantra without meters (Sanskrit)

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः । प्रत्यङ्स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ॥

The Mantra's transliteration in English

endrasya kukṣā pavate madintama ūrjaṁ vasānaḥ śravase sumaṅgalaḥ | pratyaṅ sa viśvā bhuvanābhi paprathe krīḻan harir atyaḥ syandate vṛṣā ||

The Pada Paath (Sanskrit)

आ । इन्द्र॑स्य । कु॒क्षा । प॒व॒ते॒ । म॒दिन्ऽत॑मः । ऊर्ज॑म् । वसा॑नः । श्रव॑से । सु॒ऽम॒ङ्गलः॑ । प्र॒त्यङ् । सः । विश्वा॑ । भु॒व॑ना । अ॒भि । प॒प्र॒थे॒ । क्रीळ॑न् । हरिः॑ । अत्यः॑ । स्य॒न्द॒ते॒ । वृषा॑ ॥

The Pada Paath - transliteration

ā | indrasya | kukṣā | pavate | madin-tamaḥ | ūrjam | vasānaḥ | śravase | su-maṅgalaḥ | pratyaṅ | saḥ | viśvā | bhuvanā | abhi | paprathe | krīḷan | hariḥ | atyaḥ | syandate | vṛṣā

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-080/mantra-rig-09-080-004

MANTRA NUMBER:

Mantra 4 of Sukta 80 of Mandal 9 of Rig Veda
Mantra 4 of Varga 5 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 95 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तं त्वा॑ दे॒वेभ्यो॒ मधु॑मत्तमं॒ नर॑: स॒हस्र॑धारं दुहते॒ दश॒ क्षिप॑: । नृभि॑: सोम॒ प्रच्यु॑तो॒ ग्राव॑भिः सु॒तो विश्वा॑न्दे॒वाँ आ प॑वस्वा सहस्रजित् ॥

The Mantra without meters (Sanskrit)

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः । नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥

The Mantra's transliteration in English

taṁ tvā devebhyo madhumattamaṁ naraḥ sahasradhāraṁ duhate daśa kṣipaḥ | nṛbhiḥ soma pracyuto grāvabhiḥ suto viśvān devām̐ ā pavasvā sahasrajit ||

The Pada Paath (Sanskrit)

तम् । त्वा॒ । दे॒वेभ्य॑: । मधु॑मत्ऽतमम् । नर॑: । स॒हस्र॑ऽधारम् । दु॒ह॒ते॒ । दश॑ । क्षिप॑: । नृऽभि॑: । सो॒म॒ । प्रऽच्यु॑तः । ग्राव॑ऽभिः । सु॒तः । विश्वा॑न् । दे॒वान् । आ । प॒व॒स्व॒ । स॒ह॒स्र॒ऽजि॒त् ॥

The Pada Paath - transliteration

tam | tvā | devebhyaḥ | madhumat-tamam | naraḥ | sahasra-dhāram | duhate | daśa | kṣipaḥ | nṛ-bhiḥ | soma | pra-cyutaḥ | grāva-bhiḥ | sutaḥ | viśvān | devān | ā | pavasva | sahasra-jit

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-080/mantra-rig-09-080-005

MANTRA NUMBER:

Mantra 5 of Sukta 80 of Mandal 9 of Rig Veda
Mantra 5 of Varga 5 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 96 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तं त्वा॑ ह॒स्तिनो॒ मधु॑मन्त॒मद्रि॑भिर्दु॒हन्त्य॒प्सु वृ॑ष॒भं दश॒ क्षिप॑: । इन्द्रं॑ सोम मा॒दय॒न्दैव्यं॒ जनं॒ सिन्धो॑रिवो॒र्मिः पव॑मानो अर्षसि ॥

The Mantra without meters (Sanskrit)

तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः । इन्द्रं सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥

The Mantra's transliteration in English

taṁ tvā hastino madhumantam adribhir duhanty apsu vṛṣabhaṁ daśa kṣipaḥ | indraṁ soma mādayan daivyaṁ janaṁ sindhor ivormiḥ pavamāno arṣasi ||

The Pada Paath (Sanskrit)

तम् । त्वा॒ । ह॒स्तिनः॑ । मधु॑ऽमन्तम् । अद्रि॑ऽभिः । दु॒हन्ति॑ । अ॒प्ऽसु । वृ॒ष॒भम् । दश॑ । क्षिपः॑ । इन्द्र॑म् । सो॒म॒ । मा॒दय॑न् । दैव्य॑म् । जन॑म् । सिन्धोः॑ऽइव । ऊ॒र्मिः । पव॑मानः । अ॒र्ष॒सि ॥

The Pada Paath - transliteration

tam | tvā | hastinaḥ | madhu-mantam | adri-bhiḥ | duhanti | ap-su | vṛṣabham | daśa | kṣipaḥ | indram | soma | mādayan | daivyam | janam | sindhoḥ-iva | ūrmiḥ | pavamānaḥ | arṣasi

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-081/mantra-rig-09-081-001

MANTRA NUMBER:

Mantra 1 of Sukta 81 of Mandal 9 of Rig Veda
Mantra 1 of Varga 6 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 97 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र सोम॑स्य॒ पव॑मानस्यो॒र्मय॒ इन्द्र॑स्य यन्ति ज॒ठरं॑ सु॒पेश॑सः । द॒ध्ना यदी॒मुन्नी॑ता य॒शसा॒ गवां॑ दा॒नाय॒ शूर॑मु॒दम॑न्दिषुः सु॒ताः ॥

The Mantra without meters (Sanskrit)

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः । दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥

The Mantra's transliteration in English

pra somasya pavamānasyormaya indrasya yanti jaṭharaṁ supeśasaḥ | dadhnā yad īm unnītā yaśasā gavāṁ dānāya śūram udamandiṣuḥ sutāḥ ||

The Pada Paath (Sanskrit)

प्र । सोम॑स्य । पव॑मानस्य । ऊ॒र्मयः॑ । इन्द्र॑स्य । य॒न्ति॒ । ज॒ठर॑म् । सु॒ऽपेश॑सः । द॒ध्ना । यत् । ई॒म् । उत्ऽनी॑ताः । य॒शसा॑ । गवा॑म् । दा॒नाय॑ । शूर॑म् । उ॒त्ऽअम॑न्दिषुः । सु॒ताः ॥

The Pada Paath - transliteration

pra | somasya | pavamānasya | ūrmayaḥ | indrasya | yanti | jaṭharam | su-peśasaḥ | dadhnā | yat | īm | ut-nītāḥ | yaśasā | gavām | dānāya | śūram | ut-amandiṣuḥ | sutāḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-081/mantra-rig-09-081-002

MANTRA NUMBER:

Mantra 2 of Sukta 81 of Mandal 9 of Rig Veda
Mantra 2 of Varga 6 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 98 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अच्छा॒ हि सोमः॑ क॒लशाँ॒ असि॑ष्यद॒दत्यो॒ न वोळ्हा॑ र॒घुव॑र्तनि॒र्वृषा॑ । अथा॑ दे॒वाना॑मु॒भय॑स्य॒ जन्म॑नो वि॒द्वाँ अ॑श्नोत्य॒मुत॑ इ॒तश्च॒ यत् ॥

The Mantra without meters (Sanskrit)

अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा । अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥

The Mantra's transliteration in English

acchā hi somaḥ kalaśām̐ asiṣyadad atyo na voḻhā raghuvartanir vṛṣā | athā devānām ubhayasya janmano vidvām̐ aśnoty amuta itaś ca yat ||

The Pada Paath (Sanskrit)

अच्छ॑ । हि । सोमः॑ । क॒लशा॑न् । असि॑स्यदत् । अत्यः॑ । न । वोळ्हा॑ । र॒घुऽव॑र्तनिः । वृषा॑ । अथ॑ । दे॒वाना॑म् । उ॒भय॑स्य । जन्म॑नः । वि॒द्वान् । अ॒श्नो॒ति॒ । अ॒मुतः॑ । इ॒तः । च॒ । यत् ॥

The Pada Paath - transliteration

accha | hi | somaḥ | kalaśān | asisyadat | atyaḥ | na | voḻhā | raghu-vartaniḥ | vṛṣā | atha | devānām | ubhayasya | janmanaḥ | vidvān | aśnoti | amutaḥ | itaḥ | ca | yat

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-081/mantra-rig-09-081-003

MANTRA NUMBER:

Mantra 3 of Sukta 81 of Mandal 9 of Rig Veda
Mantra 3 of Varga 6 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 99 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नः॑ सोम॒ पव॑मानः किरा॒ वस्विन्दो॒ भव॑ म॒घवा॒ राध॑सो म॒हः । शिक्षा॑ वयोधो॒ वस॑वे॒ सु चे॒तु॒ना॒ मा नो॒ गय॑मा॒रे अ॒स्मत्परा॑ सिचः ॥

The Mantra without meters (Sanskrit)

आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः । शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥

The Mantra's transliteration in English

ā naḥ soma pavamānaḥ kirā vasv indo bhava maghavā rādhaso mahaḥ | śikṣā vayodho vasave su cetunā mā no gayam āre asmat parā sicaḥ ||

The Pada Paath (Sanskrit)

आ । नः॒ । सो॒म॒ । पव॑मानः । कि॒र॒ । वसु॑ । इन्दो॒ इति॑ । भव॑ । म॒घऽवा॑ । राध॑सः । म॒हः । शिक्ष॑ । व॒यः॒ऽधः॒ । वस॑वे । सु । चे॒तुना॑ । मा । नः॒ । गय॑म् । आ॒रे । अ॒स्मत् । परा॑ । सि॒चः॒ ॥

The Pada Paath - transliteration

ā | naḥ | soma | pavamānaḥ | kira | vasu | indo iti | bhava | magha-vā | rādhasaḥ | mahaḥ | śikṣa | vayaḥ-dhaḥ | vasave | su | cetunā | mā | naḥ | gayam | āre | asmat | parā | sicaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-081/mantra-rig-09-081-004

MANTRA NUMBER:

Mantra 4 of Sukta 81 of Mandal 9 of Rig Veda
Mantra 4 of Varga 6 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 100 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः । बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥

The Mantra without meters (Sanskrit)

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः । बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥

The Mantra's transliteration in English

ā naḥ pūṣā pavamānaḥ surātayo mitro gacchantu varuṇaḥ sajoṣasaḥ | bṛhaspatir maruto vāyur aśvinā tvaṣṭā savitā suyamā sarasvatī ||

The Pada Paath (Sanskrit)

आ । नः । पूषा । पवमानः । सुऽरातयः । मित्रः । गच्छन्तु । वरुणः । सऽजोषसः । बृहस्पतिः । मरुतः । वायुः । अश्विना । त्वष्टा । सविता । सुऽयमा । सरस्वती ॥

The Pada Paath - transliteration

ā | naḥ | pūṣā | pavamānaḥ | su-rātayaḥ | mitraḥ | gacchantu | varuṇaḥ | sa-joṣasaḥ | bṛhaspatiḥ | marutaḥ | vāyuḥ | aśvinā | tvaṣṭā | savitā | su-yamā | sarasvatī

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-081/mantra-rig-09-081-005

MANTRA NUMBER:

Mantra 5 of Sukta 81 of Mandal 9 of Rig Veda
Mantra 5 of Varga 6 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 101 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒भे द्या॒वापृ॑थि॒वी वि॒श्वमि॒न्वे अ॑र्य॒मा दे॒वो अदि॑तिर्वि॒धा॒ता । भगो॒ नृशंस॑ उ॒र्व१॒॑न्तरि॑क्षं॒ विश्वे॑ दे॒वाः पव॑मानं जुषन्त ॥

The Mantra without meters (Sanskrit)

उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता । भगो नृशंस उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥

The Mantra's transliteration in English

ubhe dyāvāpṛthivī viśvaminve aryamā devo aditir vidhātā | bhago nṛśaṁsa urv antarikṣaṁ viśve devāḥ pavamānaṁ juṣanta ||

The Pada Paath (Sanskrit)

उ॒भे इति॑ । द्यावा॑पृथि॒वी इति॑ । वि॒श्व॒म्ऽइ॒न्वे । अ॒र्य॒मा । दे॒वः । अदि॑तिः । वि॒ऽधा॒ता । भगः॑ । नृऽशंसः॑ । उ॒रु । अ॒न्तरि॑क्षम् । विश्वे॑ । दे॒वाः । पव॑मानम् । जु॒ष॒न्त॒ ॥

The Pada Paath - transliteration

iti | dyāvāpṛthivī iti | viśvam-inve | aryamā | devaḥ | aditiḥ | vi-dhātā | bhagaḥ | nṛ-śaṃsaḥ | uru | antarikṣam | viśve | devāḥ | pavamānam | juṣanta

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-082/mantra-rig-09-082-001

MANTRA NUMBER:

Mantra 1 of Sukta 82 of Mandal 9 of Rig Veda
Mantra 1 of Varga 7 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 102 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- विराड्जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

असा॑वि॒ सोमो॑ अरु॒षो वृषा॒ हरी॒ राजे॑व द॒स्मो अ॒भि गा अ॑चिक्रदत् । पु॒ना॒नो वारं॒ पर्ये॑त्य॒व्ययं॑ श्ये॒नो न योनिं॑ घृ॒तव॑न्तमा॒सद॑म् ॥

The Mantra without meters (Sanskrit)

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् । पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥

The Mantra's transliteration in English

asāvi somo aruṣo vṛṣā harī rājeva dasmo abhi gā acikradat | punāno vāram pary ety avyayaṁ śyeno na yoniṁ ghṛtavantam āsadam ||

The Pada Paath (Sanskrit)

असा॑वि । सोमः॑ । अ॒रु॒षः । वृषा॑ । हरिः॑ । राजा॑ऽइ॑व । द॒स्मः । अ॒भि । गाः । अ॒चि॒क्र॒द॒त् । पु॒ना॒नः । वार॑म् । परि॑ । ए॒ति॒ । अ॒व्यय॑म् । श्ये॒नः । न । योनि॑म् । घृ॒तऽव॑न्तम् । आ॒ऽसद॑म् ॥

The Pada Paath - transliteration

asāvi | somaḥ | aruṣaḥ | vṛṣā | hariḥ | rājā-iva | dasmaḥ | abhi | gāḥ | acikradat | punānaḥ | vāram | pari | eti | avyayam | śyenaḥ | na | yonim | ghṛta-vantam | āsadam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-082/mantra-rig-09-082-002

MANTRA NUMBER:
Mantra 2 of Sukta 82 of Mandal 9 of Rig Veda
Mantra 2 of Varga 7 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 103 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

क॒विर्वे॒ध॒स्या पर्ये॑षि॒ माहि॑न॒मत्यो॒ न मृ॒ष्टो अ॒भि वाज॑मर्षसि । अ॒प॒सेध॑न्दुरि॒ता सौम मृळय घृ॒तं वसा॑न॒: परि॑ यासि नि॒र्णिज॑म् ॥

The Mantra without meters (Sanskrit)

कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि । अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥

The Mantra's transliteration in English

kavir vedhasyā pary eṣi māhinam atyo na mṛṣṭo abhi vājam arṣasi | apasedhan duritā soma mṛḻaya ghṛtaṁ vasānaḥ pari yāsi nirṇijam ||

The Pada Paath (Sanskrit)

क॒विः । वे॒ध॒स्या । परि॑ । ए॒षि॒ । माहि॑नम् । अत्यः॑ । न । मृ॒ष्टः । अ॒भि । वाज॑म् । अ॒र्ष॒सि॒ । अ॒प॒ऽसेध॑न् । दुः॒ऽइ॒ता । सो॒म॒ । मृ॒ळ॒य॒ । घृ॒तम् । वसा॑नः । परि॑ । या॒सि॒ । निः॒ऽनिज॑म् ॥

The Pada Paath - transliteration

kaviḥ | vedhasyā | pari | eṣi | māhinam | atyaḥ | na | mṛṣṭaḥ | abhi | vājam | arṣasi | apa-sedhan | duḥ-itā | soma | mṛḷaya | ghṛtam | vasānaḥ | pari | yāsi | niḥ-nijam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-082/mantra-rig-09-082-003

MANTRA NUMBER:

Mantra 3 of Sukta 82 of Mandal 9 of Rig Veda
Mantra 3 of Varga 7 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 104 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प॒र्जन्यः॑ पि॒ता म॑हि॒षस्य॑ प॒र्णिनो॒ नाभा॑ पृथि॒व्या गि॒रिषु॒ क्षयं॑ दधे । स्वसा॑र॒ आपो॑ अ॒भि गा उ॒तास॑र॒न्त्सं ग्राव॑भिर्नसते वी॒ते अ॑ध्व॒रे ॥

The Mantra without meters (Sanskrit)

पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे । स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ॥

The Mantra's transliteration in English

parjanyaḥ pitā mahiṣasya parṇino nābhā pṛthivyā giriṣu kṣayaṁ dadhe | svasāra āpo abhi gā utāsaran saṁ grāvabhir nasate vīte adhvare ||

The Pada Paath (Sanskrit)

प॒र्जन्यः॑ । पि॒ता । म॒हि॒षस्य॑ । प॒र्णिनः॑ । नाभा॑ । पृ॒थि॒व्याः । गि॒रिषु॑ । क्षय॑म् । द॒धे॒ । स्वसा॑रः । आपः॑ । अ॒भि । गाः । उ॒त । अ॒स॒र॒न् । सम् । ग्राव॑ऽभिः । न॒स॒ते॒ । वी॒ते । अ॒ध्व॒रे ॥

The Pada Paath - transliteration

parjanyaḥ | pitā | mahiṣasya | parṇinaḥ | nābhā | pṛthivyāḥ | giriṣu | kṣayam | dadhe | svasāraḥ | āpaḥ | abhi | gāḥ | uta | asaran | sam | grāva-bhiḥ | nasate | vīte | adhvare

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-082/mantra-rig-09-082-004

MANTRA NUMBER:

Mantra 4 of Sukta 82 of Mandal 9 of Rig Veda
Mantra 4 of Varga 7 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 105 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- विराड्जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते । अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥

The Mantra without meters (Sanskrit)

जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते । अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥

The Mantra's transliteration in English

jāyeva patyāv adhi śeva maṁhase pajrāyā garbha śṛṇuhi bravīmi te | antar vāṇīṣu pra carā su jīvase 'nindyo vṛjane soma jāgṛhi ||

The Pada Paath (Sanskrit)

जायाऽइव । पत्यौ । अधि । शेव । मंहसे । पज्रायाः । गर्भ । शृणुहि । ब्रवीमि । ते । अन्तः । वाणीषु । प्र । चार । सु । जीवसे । अनिन्द्यः । वृजने । सोम । जागृहि ॥

The Pada Paath - transliteration

jāyā-iva | patyau | adhi | śeva | maṃhase | pajrāyāḥ | garbha | śṛṇuhi | bravīmi | te | antaḥ | vāṇīṣu | pra | cāra | su | jīvase | anindyaḥ | vṛjane | soma | jāgṛhi

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-082/mantra-rig-09-082-005

MANTRA NUMBER:

Mantra 5 of Sukta 82 of Mandal 9 of Rig Veda
Mantra 5 of Varga 7 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 106 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुर्भारद्वाजः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यथा॒ पूर्वे॑भ्यः शत॒सा अमृ॑ध्रः सहस्र॒साः प॒र्यया॒ वाज॑मिन्दो । ए॒वा प॑वस्व सु॒वि॒ताय॒ नव्य॑से तव॑ व्र॒तमन्वाप॑: सचन्ते ॥

The Mantra without meters (Sanskrit)

यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो । एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ॥

The Mantra's transliteration in English

yathā pūrvebhyaḥ śatasā amṛdhraḥ sahasrasāḥ paryayā vājam indo | evā pavasva suvitāya navyase tava vratam anv āpaḥ sacante ||

The Pada Paath (Sanskrit)

यथा॑ । पूर्वे॑भ्यः । श॒त॒ऽसाः । अमृ॑ध्रः । स॒ह॒स्र॒ऽसाः । प॒रि॒ऽअयाः॑ । वाज॑म् । इ॒न्दो॒ इति॑ । ए॒व । प॒व॒स्व॒ । सु॒वि॒ताय॑ । नव्य॑से । तव॑ । व्र॒तम् । अनु॑ । आप॑: सचन्ते ॥

The Pada Paath - transliteration

yathā | pūrvebhyaḥ | śata-sāḥ | amṛdhraḥ | sahasra-sāḥ | pari-ayāḥ | vājam | indo iti | eva | pavasva | suvitāya | navyase | tava | vratam | anu | āpaḥ | sacante

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-083/mantra-rig-09-083-001

MANTRA NUMBER:

Mantra 1 of Sukta 83 of Mandal 9 of Rig Veda
Mantra 1 of Varga 8 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 107 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पवित्रः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प॒वित्रं॑ ते॒ वित॑तं ब्रह्मणस्पते प्र॒भुर्गात्रा॑णि॒ पर्ये॑षि वि॒श्वत॑: । अत॑प्ततनू॒र्न तदा॒मो अ॑श्नुते शृ॒तास॒ इद्वह॑न्त॒स्तत्समा॑शत ॥

The Mantra without meters (Sanskrit)

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत ॥

The Mantra's transliteration in English

pavitraṁ te vitatam brahmaṇas pate prabhur gātrāṇi pary eṣi viśvataḥ | ataptatanūr na tad āmo aśnute śṛtāsa id vahantas tat sam āśata ||

The Pada Paath (Sanskrit)

प॒वित्र॑म् । ते॒ । विऽत॑तम् । ब्र॒ह्म॒णः॒ । प॒ते॒ । प्र॒ऽभुः॒ । गात्रा॑णि । परि॑ । ए॒षि॒ । वि॒श्वत॑ः । अत॑प्तऽतनूः । न । तत् । आ॒मः । अ॒श्नु॒ते॒ । शृ॒तासः॑ । इत् । वह॑न्तः । तत् । सम् । आ॒श॒त॒ ॥

The Pada Paath - transliteration

pavitram | te | vi-tatam | brahmaṇaḥ | pate | pra-bhuḥ | gātrāṇi | pari | eṣi | viśvataḥ | atapta-tanūḥ | na | tat | āmaḥ | aśnute | śṛtāsaḥ | it | vahantaḥ | tat | sam | āśata

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-083/mantra-rig-09-083-002

MANTRA NUMBER:

Mantra 2 of Sukta 83 of Mandal 9 of Rig Veda
Mantra 2 of Varga 8 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 108 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पवित्रः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तपो॒ष्प॒वित्रं॒ वित॑तं दि॒वस्प॒दे शोच॑न्तो अस्य॒ तन्त॑वो॒ व्य॑स्थिरन् । अव॑न्त्यस्य पवी॒तार॑मा॒शवो॑ दि॒वस्पृ॒ष्ठमधि॑ तिष्ठन्ति॒ चेत॑सा ॥

The Mantra without meters (Sanskrit)

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् । अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ॥

The Mantra's transliteration in English

tapoṣ pavitraṁ vitataṁ divas pade śocanto asya tantavo vy asthiran | avanty asya pavītāram āśavo divas pṛṣṭham adhi tiṣṭhanti cetasā ||

The Pada Paath (Sanskrit)

तपोः॑ । प॒वित्र॑म् । विऽत॑तम् । दि॒वः । प॒दे । शोच॑न्तः । अ॒स्य॒ । तन्त॑वः । वि । अ॒स्थि॒र॒न् । अव॑न्ति । अ॒स्य॒ । प॒वी॒तार॑म् । आ॒ऽशवः॑ । दि॒वः । पृ॒ष्ठम् । अधि॑ । ति॒ष्ठ॒न्ति॒ । चेत॑सा ॥

The Pada Paath - transliteration

tapoḥ | pavitram | vi-tatam | divaḥ | pade | śocantaḥ | asya | tantavaḥ | vi | asthiran | avanti | asya | pavītāram | āśavaḥ | divaḥ | pṛṣṭham | adhi | tiṣṭhanti | cetasā

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-083/mantra-rig-09-083-003

MANTRA NUMBER:

Mantra 3 of Sukta 83 of Mandal 9 of Rig Veda
Mantra 3 of Varga 8 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 109 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पवित्रः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः । मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥

The Mantra without meters (Sanskrit)

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः । मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥

The Mantra's transliteration in English

arūrucad uṣasaḥ pṛśnir agriya ukṣā bibharti bhuvanāni vājayuḥ | māyāvino mamire asya māyayā nṛcakṣasaḥ pitaro garbham ā dadhuḥ ||

The Pada Paath (Sanskrit)

अरूरुचत् । उषसः । पृश्निः । अग्रियः । उक्षा । बिभर्ति । भुवनानि । वाजऽयुः । मायाऽविनः । ममिरे । अस्य । मायया । नृऽचक्षसः । पितरः । गर्भम् । आ । दधुः ॥

The Pada Paath - transliteration

arūrucat | uṣasaḥ | pṛśniḥ | agriyaḥ | ukṣā | bibharti | bhuvanāni | vāja-yuḥ | māyāvinaḥ | mamire | asya | māyayā | nṛ-cakṣasaḥ | pitaraḥ | garbham | ā | dadhuḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-083/mantra-rig-09-083-004

MANTRA NUMBER:

Mantra 4 of Sukta 83 of Mandal 9 of Rig Veda
Mantra 4 of Varga 8 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 110 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पवित्रः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ग॒न्ध॒र्व इ॒त्था प॒दम॑स्य रक्षति॒ पाति॑ दे॒वानां॒ जनि॑मा॒न्यद्भु॑तः । गृ॒भ्णाति॑ रि॒पुं नि॒धया॑ नि॒धाप॑तिः सु॒कृत्त॑मा॒ मधु॑नो भ॒क्षमा॑शत ॥

The Mantra without meters (Sanskrit)

गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः । गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥

The Mantra's transliteration in English

gandharva itthā padam asya rakṣati pāti devānāṁ janimāny adbhutaḥ | gṛbhṇāti ripuṁ nidhayā nidhāpatiḥ sukṛttamā madhuno bhakṣam āśata ||

The Pada Paath (Sanskrit)

ग॒न्ध॒र्वः । इ॒त्था । प॒दम् । अ॒स्य॒ । र॒क्ष॒ति॒ । पाति॑ । दे॒वाना॑म् । जनि॑मानि । अद्भु॑तः । गृ॒भ्णाति॑ । रि॒पुम् । नि॒ऽधया॑ । नि॒धाऽप॑तिः । सु॒कृत्ऽत॑माः । मधु॑नः । भ॒क्षम् । आ॒श॒त॒ ॥

The Pada Paath - transliteration

gandharvaḥ | itthā | padam | asya | rakṣati | pāti | devānām | janimāni | adbhutaḥ | gṛbhṇāti | ripum | ni-dhayā | nidhāpatiḥ | sukṛt-tamāḥ | madhunaḥ | bhakṣam | āśata

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-083/mantra-rig-09-083-005

MANTRA NUMBER:

Mantra 5 of Sukta 83 of Mandal 9 of Rig Veda
Mantra 5 of Varga 8 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 111 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- पवित्रः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ह॒विर्ह॑विष्मो॒ महि॒ सद्म॒ दैव्यं॒ नभो॒ वसा॑नः॒ परि॑ यास्यध्व॒रम् । राजा॑ प॒वित्र॑रथो॒ वाज॒मारु॑हः स॒हस्र॑भृष्टिर्जयसि॒ श्रवो॑ बृ॒हत् ॥

The Mantra without meters (Sanskrit)

हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् । राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥

The Mantra's transliteration in English

havir haviṣmo mahi sadma daivyaṁ nabho vasānaḥ pari yāsy adhvaram | rājā pavitraratho vājam āruhaḥ sahasrabhṛṣṭir jayasi śravo bṛhat ||

The Pada Paath (Sanskrit)

ह॒विः । ह॒वि॒ष्मः॒ । महि॑ । सद्म॑ । दैव्य॑म् । नभः॑ । वसा॑नः । परि॑ । या॒सि॒ । अ॒ध्व॒रम् । राजा॑ । प॒वित्र॑ऽरथः । वाज॑म् । आ । अ॒रु॒हः॒ । स॒हस्र॑ऽभृष्टिः । ज॒य॒सि॒ । श्रवः॑ । बृ॒हत् ॥

The Pada Paath - transliteration

haviḥ | haviṣmaḥ | mahi | sadma | daivyam | nabhaḥ | vasānaḥ | pari | yāsi | adhvaram | rājā | pavitra-rathaḥ | vājam | ā | aruhaḥ | sahasra-bhṛṣṭiḥ | jayasi | śravaḥ | bṛhat

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-084/mantra-rig-09-084-001

MANTRA NUMBER:

Mantra 1 of Sukta 84 of Mandal 9 of Rig Veda
Mantra 1 of Varga 9 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 112 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वाच्यः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पव॑स्व दे॒व॒माद॑नो॒ विच॑र्षणिर॒प्सा इन्द्रा॑य॒ वरु॑णाय वा॒यवे॑ । कृ॒धी नो॑ अ॒द्य वरि॑वः स्वस्ति॒मदु॑रुक्षि॒तौ गृ॒णीहि॒ दैव्यं॒ जन॑म् ॥

The Mantra without meters (Sanskrit)

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे । कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम् ॥

The Mantra's transliteration in English

pavasva devamādano vicarṣaṇir apsā indrāya varuṇāya vāyave | kṛdhī no adya varivaḥ svastimad urukṣitau gṛṇīhi daivyaṁ janam ||

The Pada Paath (Sanskrit)

पव॑स्व । दे॒व॒ऽमाद॑नः । विऽच॑र्षणिः । अ॒प्साः । इन्द्रा॑य । वरु॑णाय । वा॒यवे॑ । कृ॒धि । नः॒ । अ॒द्य । वरि॑वः । स्व॒स्ति॒ऽमत् । उ॒रु॒ऽक्षि॒तौ । गृ॒णी॒हि॒ । दैव्य॑म् । जन॑म् ॥

The Pada Paath - transliteration

pavasva | deva-mādanaḥ | vi-carṣaṇiḥ | apsāḥ | indrāya | varuṇāya | vāyave | kṛdhi | naḥ | adya | varivaḥ | svasti-mat | uru-kṣitau | gṛṇīhi | daivyam | janam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-084/mantra-rig-09-084-002

MANTRA NUMBER:

Mantra 2 of Sukta 84 of Mandal 9 of Rig Veda
Mantra 2 of Varga 9 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 113 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वाच्यः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ यस्त॒स्थौ भुव॑ना॒न्यम॑र्त्यो॒ विश्वा॑नि॒ सोम॒: परि॒ तान्य॑र्षति । कृ॒ण्वन्त्सं॒चृतं॑ वि॒चृत॑म॒भिष्ट॑य॒ इन्दु॑: सिषक्त्यु॒षसं॒ न सूर्य॑: ॥

The Mantra without meters (Sanskrit)

आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति । कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः ॥

The Mantra's transliteration in English

ā yas tasthau bhuvanāny amartyo viśvāni somaḥ pari tāny arṣati | kṛṇvan saṁcṛtaṁ vicṛtam abhiṣṭaya induḥ siṣakty uṣasaṁ na sūryaḥ ||

The Pada Paath (Sanskrit)

आ । यः । त॒स्थौ । भुव॑नानि । अम॑र्त्यः । विश्वा॑नि । सोमः॑ । परि॑ । तानि॑ । अ॒र्ष॒ति॒ । कृ॒ण्वन् । स॒म्ऽचृत॑म् । वि॒ऽचृत॑म् । अ॒भिष्ट॑ये । इन्दुः॑ । सि॒स॒क्ति॒ । उ॒षस॑म् । न । सूर्यः॑ ॥

The Pada Paath - transliteration

ā | yaḥ | tasthau | bhuvanāni | amartyaḥ | viśvāni | somaḥ | pari | tāni | arṣati | kṛṇvan | sam-cṛtam | vi-cṛtam | abhiṣṭaye | induḥ | sisakti | uṣasam | na | sūryaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-084/mantra-rig-09-084-003

MANTRA NUMBER:

Mantra 3 of Sukta 84 of Mandal 9 of Rig Veda
Mantra 3 of Varga 9 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 114 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वाच्यः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ यो गोभिः॑ सृ॒ज्यत॒ ओष॑धी॒ष्वा दे॒वानां॑ सु॒म्न इ॒षय॒न्नुपा॑वसुः । आ वि॒द्युता॑ पवते॒ धार॑या सु॒त इन्द्रं॒ सोमो॑ मा॒दय॒न्दैव्यं॒ जन॑म् ॥

The Mantra without meters (Sanskrit)

आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः । आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम् ॥

The Mantra's transliteration in English

ā yo gobhiḥ sṛjyata oṣadhīṣv ā devānāṁ sumna iṣayann upāvasuḥ | ā vidyutā pavate dhārayā suta indraṁ somo mādayan daivyaṁ janam ||

The Pada Paath (Sanskrit)

आ । यः । गोभिः॑ । सृ॒ज्यते॑ । ओष॑धीषु । आ । दे॒वाना॑म् । सु॒म्ने । इ॒षय॑न् । उप॑ऽवसुः । आ । वि॒ऽद्युता॑ । प॒व॒ते॒ । धार॑या । सु॒तः । इन्द्र॑म् । सोमः॑ । मा॒दय॑न् । दैव्य॑म् । जन॑म् ॥

The Pada Paath - transliteration

ā | yaḥ | gobhiḥ | sṛjyate | oṣadhīṣu | ā | devānām | sumne | iṣayan | upa-vasuḥ | ā | vi-dyutā | pavate | dhārayā | sutaḥ | indram | somaḥ | mādayan | daivyam | janam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-084/mantra-rig-09-084-004

MANTRA NUMBER:

Mantra 4 of Sukta 84 of Mandal 9 of Rig Veda
Mantra 4 of Varga 9 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 115 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वाच्यः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ए॒ष स्य सोमः॑ पवते सहस्र॒जिद्धि॑न्वा॒नो वाच॑मिषि॒रामु॑ष॒र्बुध॑म् । इन्दुः॑ समु॒द्रमुदि॑यर्ति वा॒युभि॒रेन्द्र॑स्य॒ हार्दि॑ क॒लशे॑षु सीदति ॥

The Mantra without meters (Sanskrit)

एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् । इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ॥

The Mantra's transliteration in English

eṣa sya somaḥ pavate sahasrajid dhinvāno vācam iṣirām uṣarbudham | induḥ samudram ud iyarti vāyubhir endrasya hārdi kalaśeṣu sīdati ||

The Pada Paath (Sanskrit)

ए॒षः । स्यः । सोमः॑ । प॒व॒ते॒ । स॒ह॒स्र॒ऽजित् । हि॒न्वा॒नः । वाच॑म् । इ॒षि॒राम् । उ॒षः॒ऽबुध॑म् । इन्दुः॑ । स॒मु॒द्रम् । उत् । इ॒य॒र्ति॒ । वा॒यु॒ऽभिः॑ । आ । इन्द्र॑स्य । हार्दि॑ । क॒लशे॑षु । सी॒द॒ति॒ ॥

The Pada Paath - transliteration

eṣaḥ | syaḥ | somaḥ | pavate | sahasra-jit | hinvānaḥ | vācam | iṣirām | uṣaḥ-budham | induḥ | samudram | ut | iyarti | vāyu-bhiḥ | ā | indrasya | hārdi | kalaśeṣu | sīdati

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-084/mantra-rig-09-084-005

MANTRA NUMBER:

Mantra 5 of Sukta 84 of Mandal 9 of Rig Veda
Mantra 5 of Varga 9 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 116 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- प्रजापतिर्वाच्यः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒भि त्यं गाव॒: पय॑सा पयो॒वृधं॒ सोमं॑ श्रीणन्ति म॒तिभि॑: स्व॒र्विद॑म् । ध॒नं॒ज॒यः प॑वते॒ कृत्व्यो॒ रसो॒ विप्र॑: क॒विः काव्ये॑ना॒ स्व॑र्चनाः ॥

The Mantra without meters (Sanskrit)

अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् । धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥

The Mantra's transliteration in English

abhi tyaṁ gāvaḥ payasā payovṛdhaṁ somaṁ śrīṇanti matibhiḥ svarvidam | dhanaṁjayaḥ pavate kṛtvyo raso vipraḥ kaviḥ kāvyenā svarcanāḥ ||

The Pada Paath (Sanskrit)

अ॒भि । त्यम् । गावः॑ । पय॑सा । प॒यः॒ऽवृध॑म् । सोम॑म् । श्री॒ण॒न्ति॒ । म॒तिऽभिः॑ । स्व॒ःऽविद॑म् । ध॒न॒म्ऽज॒यः । प॒व॒ते॒ । कृत्व्यः॑ । रसः॑ । विप्रः॑ । क॒विः । काव्ये॑न । स्वः॑ऽचनाः ॥

The Pada Paath - transliteration

abhi | tyam | gāvaḥ | payasā | payaḥ-vṛdham | somam | śrīṇanti | mati-bhiḥ | svaḥ-vidam | dhanam-jayaḥ | pavate | kṛtvyaḥ | rasaḥ | vipraḥ | kaviḥ | kāvyena | svaḥ-canāḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-001

MANTRA NUMBER:
Mantra 1 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 1 of Varga 10 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 117 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रा॑य सोम॒ सुषु॑त॒: परि॑ स्र॒वापामी॑वा भवतु॒ रक्ष॑सा स॒ह । मा ते॒ रस॑स्य मत्सत द्व॒या॒विनो॒ द्रवि॑णस्वन्त इ॒ह स॒न्त्विन्द॑वः ॥

The Mantra without meters (Sanskrit)

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह । मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥

The Mantra's transliteration in English

indrāya soma suṣutaḥ pari sravāpāmīvā bhavatu rakṣasā saha | mā te rasasya matsata dvayāvino draviṇasvanta iha santv indavaḥ ||

The Pada Paath (Sanskrit)

इन्द्रा॑य । सो॒म॒ । सु॒ऽसु॑तः । परि॑ । स्र॒व॒ । अप॑ । अमी॑वा । भ॒व॒तु॒ । रक्ष॑सा । स॒ह । मा । ते॒ । रस॑स्य । म॒त्स॒त॒ । द्व॒या॒विनः॑ । द्रवि॑णस्वन्तः । इ॒ह । स॒न्तु॒ । इन्द॑वः ॥

The Pada Paath - transliteration

indrāya | soma | su-sutaḥ | pari | srava | apa | amīvā | bhavatu | rakṣasā | saha | mā | te | rasasya | matsata | dvayāvinaḥ | draviṇasvantaḥ | iha | santu | indavaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-002

MANTRA NUMBER:

Mantra 2 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 2 of Varga 10 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 118 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मान्त्स॑म॒र्ये प॑वमान चोदय॒ दक्षो॑ दे॒वाना॒मसि॒ हि प्रि॒यो मद॑ः । ज॒हि शत्रूँ॑र॒भ्या भ॑न्दनाय॒तः पिबे॑न्द्र॒ सोम॒मव॑ नो॒ मृधो॑ जहि ॥

The Mantra without meters (Sanskrit)

अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः । जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥

The Mantra's transliteration in English

asmān samarye pavamāna codaya dakṣo devānām asi hi priyo madaḥ | jahi śatrūm̐r abhy ā bhandanāyataḥ pibendra somam ava no mṛdho jahi ||

The Pada Paath (Sanskrit)

अ॒स्मान् । स॒ऽम॒र्ये । प॒व॒मा॒न॒ । चो॒द॒य॒ । दक्षः॑ । दे॒वाना॑म् । असि॑ । हि । प्रि॒यः । मदः॑ । ज॒हि । शत्रू॑न् । अ॒भि । आ । भ॒न्द॒ना॒ऽय॒तः । पिब॑ । इ॒न्द्र॒ । सोम॑म् । अव॑ । न॒ः । मृधः॑ । ज॒हि॒ ॥

The Pada Paath - transliteration

asmān | sa-marye | pavamāna | codaya | dakṣaḥ | devānām | asi | hi | priyaḥ | madaḥ | jahi | śatrūn | abhi | ā | bhandanāyataḥ | piba | indra | somam | ava | naḥ | mṛdhaḥ | jahi

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-003

MANTRA NUMBER:

Mantra 3 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 3 of Varga 10 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 119 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अद॑ब्ध इन्दो पवसे म॒दिन्त॑म आ॒त्मेन्द्र॑स्य भवसि धा॒सिरु॑त्त॒मः । अ॒भि स्व॑रन्ति ब॒हवो॑ मनी॒षिणो॒ राजा॑नम॒स्य भुव॑नस्य निंसते ॥

The Mantra without meters (Sanskrit)

अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः । अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥

The Mantra's transliteration in English

adabdha indo pavase madintama ātmendrasya bhavasi dhāsir uttamaḥ | abhi svaranti bahavo manīṣiṇo rājānam asya bhuvanasya niṁsate ||

The Pada Paath (Sanskrit)

अद॑ब्धः । इ॒न्दो॒ इति॑ । प॒व॒से॒ । म॒दिन्ऽत॑मः । आ॒त्मा । इन्द्र॑स्य । भ॒व॒सि॒ । धा॒सिः । उ॒त्ऽत॒मः । अ॒भि । स्व॒र॒न्ति॒ । ब॒हवः॑ । म॒नी॒षिणः॑ । राजा॑नम् । अ॒स्य । भुव॑नस्य । नि॒ंस॒ते॒ ॥

The Pada Paath - transliteration

adabdhaḥ | indo iti | pavase | madin-tamaḥ | ātmā | indrasya | bhavasi | dhāsiḥ | ut-tamaḥ | abhi | svaranti | bahavaḥ | manīṣiṇaḥ | rājānam | asya | bhuvanasya | niṃsate

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-004

MANTRA NUMBER:

Mantra 4 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 4 of Varga 10 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 120 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- पादनिचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु । जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥

The Mantra without meters (Sanskrit)

सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु । जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥

The Mantra's transliteration in English

sahasraṇīthaḥ śatadhāro adbhuta indrāyenduḥ pavate kāmyam madhu | jayan kṣetram abhy arṣā jayann apa uruṁ no gātuṁ kṛṇu soma mīḍhvaḥ ||

The Pada Paath (Sanskrit)

सहस्रऽनीथः । शतऽधारः । अद्भुतः । इन्द्राय । इन्दुः । पवते । काम्यम् । मधु । जयन् । क्षेत्रम् । अभि । अर्ष । जयन् । अपः । उरुम् । नः । गातुम् । कृणु । सोम । मीढ्वः ॥

The Pada Paath - transliteration

sahasra-nīthaḥ | śata-dhāraḥ | adbhutaḥ | indrāya | induḥ | pavate | kāmyam | madhu | jayan | kṣetram | abhi | arṣa | jayan | apa | urum | naḥ | gātum | kṛṇu | soma | mīḍhavaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-005

MANTRA NUMBER:

Mantra 5 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 5 of Varga 10 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 121 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

कनि॑क्रदत्क॒लशे॒ गोभि॑रज्यसे॒ व्य१॒॑व्यय॑ स॒मया॒ वार॑मर्षसि । म॒र्मृ॒ज्यमा॑नो॒ अत्यो॒ न सा॑न॒सिरिन्द्र॑स्य सोम ज॒ठरे॒ सम॑क्षरः ॥

The Mantra without meters (Sanskrit)

कनिक्रदत्कलशे गोभिरज्यसे व्यव्ययं समया वारमर्षसि । मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥

The Mantra's transliteration in English

kanikradat kalaśe gobhir ajyase vy avyayaṁ samayā vāram arṣasi | marmṛjyamāno atyo na sānasir indrasya soma jaṭhare sam akṣaraḥ ||

The Pada Paath (Sanskrit)

कनि॑क्रदत् । क॒लशे॑ । गोभिः॑ । अ॒ज्य॒से॒ । वि । अ॒व्यय॑म् । स॒मया॑ । वार॑म् । अ॒र्ष॒सि॒ । म॒र्मृ॒ज्यमा॑नः । अत्यः॑ । न । सा॒न॒सिः । इन्द्र॑स्य । सो॒म॒ । ज॒ठरे॑ । सम् । अ॒क्ष॒रः॒ ॥

The Pada Paath - transliteration

kanikradat | kalaśe | gobhiḥ | ajyase | vi | avyayam | samayā | vāram | arṣasi | marmṛjyamānaḥ | atyaḥ | na | sānasiḥ | indrasya | soma | jaṭhare | sam | akṣaraḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-006

MANTRA NUMBER:

Mantra 6 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 1 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 122 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स्वा॒दुः प॑वस्व दि॒व्याय॒ जन्म॑ने स्वा॒दुरिन्द्रा॑य सु॒हवी॑तुनाम्ने । स्वा॒दुर्मि॒त्राय॒ वरु॑णाय वा॒यवे॒ बृह॒स्पत॑ये॒ मधु॑माँ॒ अदा॑भ्यः ॥

The Mantra without meters (Sanskrit)

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥

The Mantra's transliteration in English

svāduḥ pavasva divyāya janmane svādur indrāya suhavītunāmne | svādur mitrāya varuṇāya vāyave bṛhaspataye madhumām̐ adābhyaḥ ||

The Pada Paath (Sanskrit)

स्वा॒दुः । प॒व॒स्व॒ । दि॒व्याय॑ । जन्म॑ने । स्वा॒दुः । इन्द्रा॑य । सु॒हवी॑तुऽनाम्ने । स्वा॒दुः । मि॒त्राय॑ । वरु॑णाय । वा॒यवे॑ । बृह॒स्पत॑ये । मधु॑ऽमान् । अदा॑भ्यः ॥

The Pada Paath - transliteration

svāduḥ | pavasva | divyāya | janmane | svāduḥ | indrāya | suhavītu-nāmne | svāduḥ | mitrāya | varuṇāya | vāyave | bṛhaspataye | madhu-mān | adābhyaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-007

MANTRA NUMBER:

Mantra 7 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 2 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 123 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अत्यं॑ मृजन्ति क॒लशे॒ दश॒ क्षिप॑: प्र विप्रा॑णां म॒तयो॒ वाच॑ ईरते । पव॑माना अ॒भ्य॑र्षन्ति सुष्टु॒तिमेन्द्रं॑ विशन्ति मदि॒रास॒ इन्द॑वः ॥

The Mantra without meters (Sanskrit)

अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते । पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥

The Mantra's transliteration in English

atyam mṛjanti kalaśe daśa kṣipaḥ pra viprāṇām matayo vāca īrate | pavamānā abhy arṣanti suṣṭutim endraṁ viśanti madirāsa indavaḥ ||

The Pada Paath (Sanskrit)

अत्य॑म् । मृ॒ज॒न्ति॒ । क॒लशे॑ । दश॑ । क्षिप॑ः । प्र । विप्रा॑णाम् । म॒तय॑ः । वाच॑ः । ई॒र॒ते॒ । पव॑मानाः । अ॒भि । अ॒र्ष॒न्ति॒ । सु॒ऽस्तु॒तिम् । आ । इन्द्र॑म् । वि॒श॒न्ति॒ । म॒दि॒रास॑ः । इन्द॑वः ॥

The Pada Paath - transliteration

atyam | mṛjanti | kalaśe | daśa | kṣipaḥ | pra | viprāṇām | matayaḥ | vācaḥ | īrate | pavamānāḥ | abhi | arṣanti | su-stutim | ā | indram | viśanti | madirāsaḥ | indavaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-008

MANTRA NUMBER:

Mantra 8 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 3 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 124 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- स्वराडार्चीजगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पव॑मानो अ॒भ्य॑र्षा सु॒वीर्य॑मु॒र्वीं गव्यू॑तिं॒ महि॒ शर्म॑ स॒प्रथः॑ । माकि॑र्नो अ॒स्य परि॑षूतिरीश॒तेन्दो॒ जये॑म॒ त्वया॒ धनं॑धनम् ॥

The Mantra without meters (Sanskrit)

पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः । माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥

The Mantra's transliteration in English

pavamāno abhy arṣā suvīryam urvīṁ gavyūtim mahi śarma saprathaḥ | mākir no asya pariṣūtir īśatendo jayema tvayā dhanaṁ-dhanam ||

The Pada Paath (Sanskrit)

पव॑मानः । अ॒भि । अ॒र्ष॒ । सु॒ऽवीर्य॑म् । उ॒र्वीम् । गव्यू॑तिम् । महि॑ । शर्म॑ । स॒ऽप्रथः॑ । माकिः॑ । नः॒ । अ॒स्य । परि॑ऽसूतिः । ई॒श॒त॒ । इन्दो॒ इति॑ । जये॑म । त्वया॑ । धन॑म्ऽधनम् ॥

The Pada Paath - transliteration

pavamānaḥ | abhi | arṣa | su-vīryam | urvīm | gavyūtim | mahi | śarma | sa-prathaḥ | mākiḥ | naḥ | asya | pari-sūtiḥ | īśata | indo iti | jayema | tvayā | dhanam-dhanam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-009

MANTRA NUMBER:

Mantra 9 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 4 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 125 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अधि॒ द्याम॑स्थाद्वृ॒ष॒भो वि॑चक्ष॒णोऽरू॑रुच॒द्वि दि॒वो रो॑च॒ना क॒विः । राजा॑ प॒वित्र॒मत्ये॑ति॒ रोरु॑वद्दि॒वः पी॒यूषं॑ दुहते नृ॒चक्ष॑सः ॥

The Mantra without meters (Sanskrit)

अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः । राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥

The Mantra's transliteration in English

adhi dyām asthād vṛṣabho vicakṣaṇo 'rūrucad vi divo rocanā kaviḥ | rājā pavitram aty eti roruvad divaḥ pīyūṣaṁ duhate nṛcakṣasaḥ ||

The Pada Paath (Sanskrit)

अधि॑ । द्याम् । अ॒स्था॒त् । वृ॒ष॒भः । वि॒ऽच॒क्ष॒णः । अरू॑रुचात् । वि । दि॒वः । रो॒च॒ना । क॒विः । राजा॑ । प॒वित्र॑म् । अति॑ । ए॒ति॒ । रोरु॑वत् । दि॒वः । पी॒यूष॑म् । दु॒ह॒ते॒ नृ॒चक्ष॑सः ॥

The Pada Paath - transliteration

adhi | dyām | asthāt | vṛṣabhaḥ | vi-cakṣaṇaḥ | arūrucāt | vi | divaḥ | rocanā | kaviḥ | rājā | pavitram | ati | eti | roruvat | divaḥ | pīyūṣam | duhate | nṛ-cakṣasaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-010

MANTRA NUMBER:

Mantra 10 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 5 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 126 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दि॒वो नाके॒ मधु॑जिह्वा अस॒श्चतो॑ वे॒ना दु॑हन्त्यु॒क्षणं॑ गिरि॒ष्ठाम् । अ॒प्सु द्र॒प्सं वा॑वृधा॒नं स॑मु॒द्र आ सिन्धो॑रू॒र्मा मधु॑मन्तं प॒वित्र॒ आ ॥

The Mantra without meters (Sanskrit)

दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् । अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ ॥

The Mantra's transliteration in English

divo nāke madhujihvā asaścato venā duhanty ukṣaṇaṁ giriṣṭhām | apsu drapsaṁ vāvṛdhānaṁ samudra ā sindhor ūrmā madhumantam pavitra ā ||

The Pada Paath (Sanskrit)

दि॒वः । नाके॑ । मधु॑ऽजिह्वाः । अ॒स॒श्चतः॑ । वे॒नाः । दु॒ह॒न्ति॒ । उ॒क्षण॑म् । गि॒रि॒ऽस्थाम् । अ॒प्ऽसु । द्र॒प्सम् । व॒वृ॒धा॒नम् । स॒मु॒द्रे । आ । सिन्धोः॑ । ऊ॒र्मा । मधु॑ऽमन्तम् । प॒वित्रे॑ । आ ॥

The Pada Paath - transliteration

divaḥ | nāke | madhu-jihvāḥ | asaścataḥ | venāḥ | duhanti | ukṣaṇam | giri-sthām | ap-su | drapsam | vavṛdhānam | samudre | ā | sindhoḥ | ūrmā | madhu-mantam | pavitre | ā

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-011

MANTRA NUMBER:

Mantra 11 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 6 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 127 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नाके॑ सुप॒र्णमु॑पपप्ति॒वांसं॒ गिरो॑ वे॒नाना॑मकृपन्त पू॒र्वीः । शिशुं॑ रिहन्ति म॒तय॒: पनि॑प्नतं हिर॒ण्ययं॑ शकु॒नं क्षाम॑णि॒ स्थाम् ॥

The Mantra without meters (Sanskrit)

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः । शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥

The Mantra's transliteration in English

nāke suparṇam upapaptivāṁsaṁ giro venānām akṛpanta pūrvīḥ | śiśuṁ rihanti matayaḥ panipnataṁ hiraṇyayaṁ śakunaṁ kṣāmaṇi sthām ||

The Pada Paath (Sanskrit)

नाके॑ । सु॒ऽप॒र्णम् । उ॒प॒प॒प्ति॒ऽवांस॑म् । गिर॑: । वे॒नाना॑म् । अ॒कृ॒प॒न्त॒ । पू॒र्वीः । शिशु॑म् । रि॒ह॒न्ति॒ । म॒तय॑: । पनि॑प्नतम् । हि॒र॒ण्यय॑म् । श॒कु॒नम् । क्षाम॑णि । स्था॒म् ॥

The Pada Paath - transliteration

nāke | su-parṇam | upapapti-vāṃsam | giraḥ | venānām | akṛpanta | pūrvīḥ | śiśum | rihanti | matayaḥ | panipnatam | hiraṇyayam | śakunam | kṣāmaṇi | sthām

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-085/mantra-rig-09-085-012

MANTRA NUMBER:

Mantra 12 of Sukta 85 of Mandal 9 of Rig Veda
Mantra 7 of Varga 11 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 128 of Anuvaak 4 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वेनो भार्गवः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ऊ॒र्ध्वो ग॑न्ध॒र्वो अधि॒ नाके॑ अस्था॒द्विश्वा॑ रू॒पा प्र॑ति॒चक्षा॑णो अस्य । भा॒नुः शु॒क्रेण॑ शो॒चिषा॒ व्य॑द्यौ॒त्प्रारू॑रुच॒द्रोद॑सी मा॒तरा॒ शुचि॑: ॥

The Mantra without meters (Sanskrit)

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य । भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥

The Mantra's transliteration in English

ūrdhvo gandharvo adhi nāke asthād viśvā rūpā praticakṣāṇo asya | bhānuḥ śukreṇa śociṣā vy adyaut prārūrucad rodasī mātarā śuciḥ ||

The Pada Paath (Sanskrit)

ऊ॒र्ध्वः । ग॒न्ध॒र्वः । अधि॑ । नाके॑ । अ॒स्था॒त् । विश्वा॑ । रू॒पा । प्र॒च॒ति॒ऽचक्षा॑णः । अ॒स्य॒ । भा॒नुः । शु॒क्रेण॑ । शो॒चिषा॑ । वि । अ॒द्यौ॒त् । प्र । अ॒रू॒रु॒च॒त् । रोद॑सी॒ इति॑ । मा॒तरा॑ । शुचि॑: ॥

The Pada Paath - transliteration

ūrdhvaḥ | gandharvaḥ | adhi | nāke | asthāt | viśvā | rūpā | prcati-cakṣāṇaḥ | asya | bhānuḥ | śukreṇa | śociṣā | vi | adyaut | pra | arūrucat | rodasī iti | mātarā | śuciḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-086/mantra-rig-09-086-001

MANTRA NUMBER:

Mantra 1 of Sukta 86 of Mandal 9 of Rig Veda
Mantra 1 of Varga 12 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 1 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- अकृष्टा माषाः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र त॑ आ॒शव॑: पवमान धी॒जवो॒ मदा॑ अर्षन्ति रघु॒जा इ॑व॒ त्मना॑ । दि॒व्याः सु॑प॒र्णा मधु॑मन्त॒ इन्द॑वो म॒दिन्त॑मास॒: परि॒ कोश॑मासते ॥

The Mantra without meters (Sanskrit)

प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना । दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते ॥

The Mantra's transliteration in English

pra ta āśavaḥ pavamāna dhījavo madā arṣanti raghujā iva tmanā | divyāḥ suparṇā madhumanta indavo madintamāsaḥ pari kośam āsate ||

The Pada Paath (Sanskrit)

प्र । ते॒ । आ॒शवः॑ । प॒व॒मा॒न॒ । धी॒ऽजवः॑ । मदाः॑ । अ॒र्ष॒न्ति॒ । र॒घु॒जाःऽइ॑व । त्मना॑ । दि॒व्याः । सु॒ऽप॒र्णाः । मधु॑ऽमन्तः । इन्द॑वः । म॒दिन्ऽत॑मासः । परि॑ । कोश॑म् । आ॒स॒ते॒ ॥

The Pada Paath - transliteration

pra | te | āśavaḥ | pavamāna | dhī-javaḥ | madāḥ | arṣanti | raghujāḥ-iva | tmanā | divyāḥ | su-parṇāḥ | madhu-mantaḥ | indavaḥ | madin-tamāsaḥ | pari | kośam | āsate

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-086/mantra-rig-09-086-002

MANTRA NUMBER:

Mantra 2 of Sukta 86 of Mandal 9 of Rig Veda
Mantra 2 of Varga 12 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 2 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अकृष्टा माषाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र ते मदा॑सो मदि॒रास॑ आ॒शवोऽसृ॑क्षत॒ रथ्या॑सो॒ यथा॒ पृथ॑क् । धे॒नुर्न व॒त्सं पय॑सा॒भि व॒ज्रिण॒मिन्द्र॒मिन्द॑वो॒ मधु॑मन्त ऊ॒र्मय॑: ॥

The Mantra without meters (Sanskrit)

प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् । धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥

The Mantra's transliteration in English

pra te madāso madirāsa āśavo 'sṛkṣata rathyāso yathā pṛthak | dhenur na vatsam payasābhi vajriṇam indram indavo madhumanta ūrmayaḥ ||

The Pada Paath (Sanskrit)

प्र । ते॒ । मदा॑सः । म॒दि॒रास॑: । आ॒शवः॑ । असृ॑क्षत । रथ्या॑सः । यथा॑ । पृथ॑क् । धे॒नुः । न । व॒त्सम् । पय॑सा । अ॒भि । व॒ज्रिण॑म् । इन्द्र॑म् । इन्द॑वः । मधु॑ऽमन्तः । ऊ॒र्मय॑: ॥

The Pada Paath - transliteration

pra | te | madāsaḥ | madirāsaḥ | āśavaḥ | asṛkṣata | rathyāsaḥ | yathā | pṛthak | dhenuḥ | na | vatsam | payasā | abhi | vajriṇam | indram | indavaḥ | madhu-mantaḥ | ūrmayaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-086/mantra-rig-09-086-003

MANTRA NUMBER:

Mantra 3 of Sukta 86 of Mandal 9 of Rig Veda
Mantra 3 of Varga 12 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 3 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अकृष्टा माषाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अत्यो॒ न हि॑या॒नो अ॒भि वाज॑मर्ष स्व॒र्वित्कोश॑ं दि॒वो अद्रि॑मातरम् । वृषा॑ प॒वित्रे॒ अधि॒ सानो॑ अ॒व्यये॒ सोम॑: पुना॒न इ॑न्द्रि॒याय॒ धाय॑से ॥

The Mantra without meters (Sanskrit)

अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् । वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥

The Mantra's transliteration in English

atyo na hiyāno abhi vājam arṣa svarvit kośaṁ divo adrimātaram | vṛṣā pavitre adhi sāno avyaye somaḥ punāna indriyāya dhāyase ||

The Pada Paath (Sanskrit)

अत्य॑ः । न । हि॒या॒नः । अ॒भि । वाज॑म् । अ॒र्ष॒ । स्व॒ःऽवित् । कोश॑म् । दि॒वः । अद्रि॑ऽमातरम् । वृषा॑ । प॒वित्रे॑ । अधि॑ । सानौ॑ । अ॒व्यये॑ । सोम॑ः । पु॒ना॒नः । इ॒न्द्रि॒याय॑ । धाय॑से ॥

The Pada Paath - transliteration

atyaḥ | na | hiyānaḥ | abhi | vājam | arṣa | svaḥ-vit | kośam | divaḥ | adri-mātaram | vṛṣā | pavitre | adhi | sānau | avyaye | somaḥ | punānaḥ | indriyāya | dhāyase

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-086/mantra-rig-09-086-004

MANTRA NUMBER:

Mantra 4 of Sukta 86 of Mandal 9 of Rig Veda
Mantra 4 of Varga 12 of Adhyaya 3 of Ashtak 7 of Rig Veda
Mantra 4 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- अकृष्टा माषाः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- निचृज्जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र त॒ आश्वि॑नीः पवमान धी॒जुवो॑ दि॒व्या अ॑सृग्र॒न्पय॑सा॒ धरी॑मणि । प्रान्तऋष॑य॒: स्थावि॑रीरसृक्षत॒ ये त्वा॑ मृ॒जन्त्यृ॑षिषाण वे॒धस॑: ॥

The Mantra without meters (Sanskrit)

वृषा॑ । वृष्णे॑ । रोरु॑वत् । अं॒शुः । अ॒स्मै॒ । पव॑मानः । रुश॑त् । ई॒र्ते॒ । पयः॑ । गोः । स॒हस्र॑म् । ऋक्वा॑ । प॒थिऽभिः॑ । व॒चः॒ऽवित् । अ॒ध्व॒स्मऽभिः॑ । सूरः॑ । अण्व॑म् । वि । या॒ति॒ ॥

The Pada Paath - transliteration

vṛṣā | vṛṣṇe | roruvat | aṃśuḥ | asmai | pavamānaḥ | ruśat | īrte | payaḥ | goḥ | sahasram | ṛkvā | pathi-bhiḥ | vacaḥ-vit | adhvasma-bhiḥ | sūraḥ | aṇvam | vi | yāti

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-091/mantra-rig-09-091-004

MANTRA NUMBER:

Mantra 4 of Sukta 91 of Mandal 9 of Rig Veda
Mantra 4 of Varga 1 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 82 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इंन्द ऊर्णुहि वि वाजान् । वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥

The Mantra without meters (Sanskrit)

रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् । वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥

The Mantra's transliteration in English

rujā dṛḻhā cid rakṣasaḥ sadāṁsi punāna inda ūrṇuhi vi vājān | vṛścopariṣṭāt tujatā vadhena ye anti dūrād upanāyam eṣām ||

The Pada Paath (Sanskrit)

रुजा । दृळ्हा । चित् । रक्षसः । सदांसि । पुनानः । इन्दो इति । ऊर्णुहि । वि । वाजान् । वृश्च । उपरिष्टात् । तुजता । वधेन । ये । अन्ति । दूरात् । उपऽनायम् । एषाम् ॥

The Pada Paath - transliteration

rujā | dṛḻhā | cit | rakṣasaḥ | sadāṃsi | punānaḥ | indo iti | ūrṇuhi | vi | vājān | vṛśca | upariṣṭāt | tujatā | vadhena | ye | anti | dūrāt | upa-nāyam | eṣām

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-091/mantra-rig-09-091-005

MANTRA NUMBER:

Mantra 5 of Sukta 91 of Mandal 9 of Rig Veda
Mantra 5 of Varga 1 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 83 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स प्र॒त्न॒वन्नव्य॑से विश्ववार सू॒क्ताय॑ प॒थः कृ॑णु॒हि प्राचः॑ । ये दु॒ःषहा॑सो व॒नुषा॑ बृ॒हन्त॒स्ताँस्ते॑ अश्याम पुरुकृत्पुरुक्षो ॥

The Mantra without meters (Sanskrit)

स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः । ये दुःषहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ॥

The Mantra's transliteration in English

sa pratnavan navyase viśvavāra sūktāya pathaḥ kṛṇuhi prācaḥ | ye duḥṣahāso vanuṣā bṛhantas tām̐s te aśyāma purukṛt purukṣo ||

The Pada Paath (Sanskrit)

सः । प्र॒त्न॒ऽवत् । नव्य॑से । वि॒श्व॒ऽवा॒र॒ । सु॒ऽउ॒क्ताय॑ । प॒थः । कृ॒णु॒हि॒ । प्राचः॑ । ये । दु॒ःऽसहा॑सः । व॒नुषा॑ । बृ॒हन्तः॑ । तान् । ते॒ । अ॒श्य्चाम॒ । पु॒रु॒ऽकृ॒त् । पु॒रु॒क्षो॒ इति॑ पुरुऽक्षो ॥

The Pada Paath - transliteration

saḥ | pratna-vat | navyase | viśva-vāra | su-uktāya | pathaḥ | kṛṇuhi | prācaḥ | ye | duḥ-sahāsaḥ | vanuṣā | bṛhantaḥ | tān | te | aśycāma | puru-kṛt | purukṣo itipuru-kṣo

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-091/mantra-rig-09-091-006

MANTRA NUMBER:

Mantra 6 of Sukta 91 of Mandal 9 of Rig Veda
Mantra 6 of Varga 1 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 84 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ए॒वा पु॑ना॒नो अ॒पः स्व१॒॑र्गा अ॒स्मभ्यं॑ तो॒का तन॑यानि॒ भूरि॑ । शं न॒: क्षेत्र॑मु॒रु ज्योतीं॑षि सोम॒ ज्योङ्न॒: सूर्यं॑ दृ॒शये॑ रिरीहि ॥

The Mantra without meters (Sanskrit)

एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि । शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥

The Mantra's transliteration in English

evā punāno apaḥ svar gā asmabhyaṁ tokā tanayāni bhūri | śaṁ naḥ kṣetram uru jyotīṁṣi soma jyoṅ naḥ sūryaṁ dṛśaye rirīhi ||

The Pada Paath (Sanskrit)

ए॒व । पु॒ना॒नः । अ॒पः । स्व१॒॑रिति॑ स्वः॑ । गाः । अ॒स्मभ्य॑म् । तो॒का । तन॑यानि । भूरि॑ । शम् । नः॒ । क्षेत्र॑म् । उ॒रु । ज्योतीं॑षि । सो॒म॒ । ज्योक् । नः॒ । सूर्य॑म् । दृ॒शये॑ । रि॒री॒हि॒ ॥

The Pada Paath - transliteration

eva | punānaḥ | apaḥ | svaḥ | gāḥ | asmabhyam | tokā | tanayāni | bhūri | śam | naḥ | kṣetram | uru | jyotīṁṣi | soma | jyok | naḥ | sūryam | dṛśaye | rirīhi

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-001

MANTRA NUMBER:

Mantra 1 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 1 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 85 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॑ सुवा॒नो हरि॑रं॒शुः प॒वित्रे॒ रथो॒ न स॑र्जि स॒नये॑ हिया॒नः । आप॒च्छ्लोक॑मिन्द्रि॒यं पू॒यमा॑नः॒ प्रति॑ दे॒वाँ अ॑जुषत॒ प्रयो॑भिः ॥

The Mantra without meters (Sanskrit)

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः । आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥

The Mantra's transliteration in English

pari suvāno harir aṁśuḥ pavitre ratho na sarji sanaye hiyānaḥ | āpac chlokam indriyam pūyamānaḥ prati devām̐ ajuṣata prayobhiḥ ||

The Pada Paath (Sanskrit)

परि॑ । सु॒वा॒नः । हरिः॑ । अं॒शुः । प॒वित्रे॑ । रथः॑ । न । स॒र्जि॒ । स॒नये॑ । हि॒या॒नः । आप॒त् । श्लोक॑म् । इ॒न्द्रि॒यम् । पू॒यमा॑नः । प्रति॑ । दे॒वान् । अ॒जु॒ष॒त॒ । प्रयः॑ऽभिः ॥

The Pada Paath - transliteration

pari | suvānaḥ | hariḥ | aṃśuḥ | pavitre | rathaḥ | na | sarji | sanaye | hiyānaḥ | āpat | ślokam | indriyam | pūyamānaḥ | prati | devān | ajuṣata | prayaḥ-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-002

MANTRA NUMBER:

Mantra 2 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 2 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 86 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अच्छा॑ नृ॒चक्षा॑ असरत्प॒वित्रे॒ नाम॒ दधा॑नः क॒विर॑स्य॒ योनौ॑ । सीद॒न्होते॑व॒ सद॑ने च॒मूषूपे॑मग्म॒न्नृष॑यः स॒प्त विप्राः॑ ॥

The Mantra without meters (Sanskrit)

अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ । सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥

The Mantra's transliteration in English

acchā nṛcakṣā asarat pavitre nāma dadhānaḥ kavir asya yonau | sīdan hoteva sadane camūṣūpem agmann ṛṣayaḥ sapta viprāḥ ||

The Pada Paath (Sanskrit)

अच्छ॑ । नृ॒ऽचक्षाः॑ । अ॒स॒र॒त् । प॒वित्रे॑ । नाम॑ । दधा॑नः । क॒विः । अ॒स्य॒ । योनौ॑ । सीद॑न् । होता॑ऽइव । सद॑ने । च॒मूषु॑ । उप॑ । ई॒म् । अ॒ग्म॒न् । ऋष॑यः । स॒प्त । विप्राः॑ ॥

The Pada Paath - transliteration

accha | nṛ-cakṣāḥ | asarat | pavitre | nāma | dadhānaḥ | kaviḥ | asya | yonau | sīdan | hotā-iva | sadane | camūṣu | upa | īm | agman | ṛṣayaḥ | sapta | viprāḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-003

MANTRA NUMBER:

Mantra 3 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 3 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 87 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम् । भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः ॥

The Mantra without meters (Sanskrit)

प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम् । भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः ॥

The Mantra's transliteration in English

pra sumedhā gātuvid viśvadevaḥ somaḥ punānaḥ sada eti nityam | bhuvad viśveṣu kāvyeṣu rantānu janān yatate pañca dhīraḥ ||

The Pada Paath (Sanskrit)

प्र । सुऽमेधाः । गातुऽवित् । विश्वऽदेवः । सोमः । पुनानः । सदः । एति । नित्यम् । भुवत् । विश्वेषु । काव्येषु । रन्ता । अनु । जनान् । यतते । पञ्च । धीरः ॥

The Pada Paath - transliteration

pra | su-medhāḥ | gātu-vit | viśva-devaḥ | somaḥ | punānaḥ | sadaḥ | eti | nityam | bhuvat | viśveṣu | kāvyeṣu | rantā | anu | janān | yatate | pañca | dhīraḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-004

MANTRA NUMBER:

Mantra 4 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 4 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 88 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तव॒ त्ये सो॑म पवमान नि॒ण्ये विश्वे॑ दे॒वास्त्रय॑ एकाद॒शासः॑ । दश॑ स्व॒धाभि॒रधि॒ सानो॒ अव्ये॑ मृ॒जन्ति॑ त्वा न॒द्यः॑ स॒प्त य॒ह्वीः ॥

The Mantra without meters (Sanskrit)

तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः । दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥

The Mantra's transliteration in English

tava tye soma pavamāna niṇye viśve devās traya ekādaśāsaḥ | daśa svadhābhir adhi sāno avye mṛjanti tvā nadyaḥ sapta yahvīḥ ||

The Pada Paath (Sanskrit)

तव॑ । त्ये । सो॒म॒ । प॒व॒मा॒न॒ । नि॒ण्ये । विश्वे॑ । दे॒वाः । त्रयः॑ । ए॒का॒द॒शासः॑ । दश॑ । स्व॒धाभिः॑ । अधि॑ । सानौ॑ । अव्ये॑ । मृ॒जन्ति॑ । त्वा॒ । न॒द्यः॑ । स॒प्त । य॒ह्वीः ॥

The Pada Paath - transliteration

tava | tye | soma | pavamāna | niṇye | viśve | devāḥ | trayaḥ | ekādaśāsaḥ | daśa | svadhābhiḥ | adhi | sānau | avye | mṛjanti | tvā | nadyaḥ | sapta | yahvīḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-005

MANTRA NUMBER:

Mantra 5 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 5 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 89 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त । ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ॥

The Mantra without meters (Sanskrit)

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त । ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ॥

The Mantra's transliteration in English

tan nu satyam pavamānasyāstu yatra viśve kāravaḥ saṁnasanta | jyotir yad ahne akṛṇod u lokam prāvan manuṁ dasyave kar abhīkam ||

The Pada Paath (Sanskrit)

तत् । नु । सत्यम् । पवमानस्य । अस्तु । यत्र । विश्वे । कारवः । सम्ऽनसन्त । ज्योतिः । यत् । अह्ने । अकृणोत् । ऊँ इति । लोकम् । प्र । आवत् । मनुम् । दस्यवे । कः । अभीकम् ॥

The Pada Paath - transliteration

tat | nu | satyam | pavamānasya | astu | yatra | viśve | kāravaḥ | sam-nasanta | jyotiḥ | yat | ahne | akṛṇot | oṃ iti | lokam | pra | āvat | manum | dasyave | kaḥ | abhīkam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-092/mantra-rig-09-092-006

MANTRA NUMBER:

Mantra 6 of Sukta 92 of Mandal 9 of Rig Veda
Mantra 6 of Varga 2 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 90 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कश्यपः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॒ सद्मे॑व पशु॒मान्ति॒ होता॒ राजा॒ न स॒त्यः समि॑तीरिया॒नः । सोमः॑ पुना॒नः क॒लशाँ॑ अयासी॒त्सीद॑न्मृ॒गो न म॑हि॒षो वने॑षु ॥

The Mantra without meters (Sanskrit)

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः । सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥

The Mantra's transliteration in English

pari sadmeva paśumānti hotā rājā na satyaḥ samitīr iyānaḥ | somaḥ punānaḥ kalaśām̐ ayāsīt sīdan mṛgo na mahiṣo vaneṣu ||

The Pada Paath (Sanskrit)

पर् । सद्म॑ऽइव । प॒शु॒ऽमन्ति॑ । होता॑ । राजा॑ । न । स॒त्यः । सम्ऽइ॑तीः । इ॒या॒नः । सोमः॑ । पु॒ना॒नः । क॒लशा॑न् । अ॒या॒सी॒त् । सीद॑न् । मृ॒गः । न । म॒हि॒षः । वने॑षु ॥

The Pada Paath - transliteration

par | sadma-iva | paśu-manti | hotā | rājā | na | satyaḥ | sam-itīḥ | iyānaḥ | somaḥ | punānaḥ | kalaśān | ayāsīt | sīdan | mṛgaḥ | na | mahiṣaḥ | vaneṣu

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-093/mantra-rig-09-093-001

MANTRA NUMBER:

Mantra 1 of Sukta 93 of Mandal 9 of Rig Veda
Mantra 1 of Varga 3 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 91 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- नोधाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः । हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥

The Mantra without meters (Sanskrit)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः । हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥

The Mantra's transliteration in English

sākamukṣo marjayanta svasāro daśa dhīrasya dhītayo dhanutrīḥ | hariḥ pary adravaj jāḥ sūryasya droṇaṁ nanakṣe atyo na vājī ||

The Pada Paath (Sanskrit)

साकम्ऽउक्षः । मर्जयन्त । स्वसारः । दश । धीरस्य । धीतयः । धनुत्रीः । हरिः । परि । अद्रवत् । जाः । सूर्यस्य । द्रोणम् । ननक्षे । अत्यः । न । वाजी ॥

The Pada Paath - transliteration

sākam-ukṣaḥ | marjayanta | svasāraḥ | daśa | dhīrasya | dhītayaḥ | dhanutrīḥ | hariḥ | pari | adravat | jāḥ | sūryasya | droṇam | nanakṣe | atyaḥ | na | vājī

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-093/mantra-rig-09-093-002

MANTRA NUMBER:

Mantra 2 of Sukta 93 of Mandal 9 of Rig Veda
Mantra 2 of Varga 3 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 92 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- नोधाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सं मा॒तृभि॒र्न शिशु॒र्वाव॑शा॒नो वृषा॑ दधन्वे पु॒रु॒वारो॑ अ॒द्भिः । मर्यो॒ न योषा॑म॒भि नि॑ष्कृ॒तं यन्त्सं ग॑च्छते क॒लश॑ उ॒स्रिया॑भिः ॥

The Mantra without meters (Sanskrit)

सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः । मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥

The Mantra's transliteration in English

sam mātṛbhir na śiśur vāvaśāno vṛṣā dadhanve puruvāro adbhiḥ | maryo na yoṣām abhi niṣkṛtaṁ yan saṁ gacchate kalaśa usriyābhiḥ ||

The Pada Paath (Sanskrit)

सम् । मा॒तृऽभिः॑ । न । शिशुः॑ । वा॒व॒शा॒नः । वृषा॑ । द॒ध॒न्वे॒ । पु॒रु॒ऽवारः॑ । अ॒त्ऽभिः । मर्यः॑ । न । योषा॑म् । अ॒भि । निः॒ऽकृ॒तम् । यन् । सम् । ग॒च्छ॒ते॒ । क॒लशे॑ । उ॒स्रिया॑भिः ॥

The Pada Paath - transliteration

sam | mātṛ-bhiḥ | na | śiśuḥ | vāvaśānaḥ | vṛṣā | dadhanve | puru-vāraḥ | at-bhiḥ | maryaḥ | na | yoṣām | abhi | niḥ-kṛtam | yan | sam | gacchate | kalaśe | usriyābhiḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-093/mantra-rig-09-093-003

MANTRA NUMBER:

Mantra 3 of Sukta 93 of Mandal 9 of Rig Veda
Mantra 3 of Varga 3 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 93 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- नोधाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒त प्र पि॑प्य॒ ऊध॒रघ्न्या॑या॒ इन्दु॒र्धारा॑भिः सचते सु॒मे॒धाः । मू॒र्धानं॒ गाव॒: पय॑सा च॒मूष्व॒भि श्री॑णन्ति॒ वसु॑भि॒र्न नि॒क्तैः ॥

The Mantra without meters (Sanskrit)

उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः । मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥

The Mantra's transliteration in English

uta pra pipya ūdhar aghnyāyā indur dhārābhiḥ sacate sumedhāḥ | mūrdhānaṁ gāvaḥ payasā camūṣv abhi śrīṇanti vasubhir na niktaiḥ ||

The Pada Paath (Sanskrit)

उ॒त । प्र । पि॒प्ये॒ । ऊधः॑ । अघ्न्या॑याः । इन्दुः॑ । धारा॑भिः । स॒च॒ते॒ । सु॒ऽमे॒धाः । मू॒र्धान॑म् । गावः॑ । पय॑सा । च॒मूषु॑ । अ॒भि । श्री॒ण॒न्ति॒ । वसु॑ऽभिः॑ । न । नि॒क्तैः ॥

The Pada Paath - transliteration

uta | pra | pipye | ūdhaḥ | aghnyāyāḥ | induḥ | dhārābhiḥ | sacate | su-medhāḥ | mūdhārnam | gāvaḥ | payasā | camūṣu | abhi | śrīṇanti | vasu-bhiḥ | na | niktaiḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-093/mantra-rig-09-093-004

MANTRA NUMBER:

Mantra 4 of Sukta 93 of Mandal 9 of Rig Veda
Mantra 4 of Varga 3 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 94 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- नोधाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स नो॑ दे॒वेभिः॑ पवमान र॒देन्दो॑ र॒यिम॒श्विनं॑ वावशा॒नः । र॒थि॒रा॒यता॑मु॒शती पु॒रंधि॑रस्म॒द्र्य१॒॑गा दा॒वने॒ वसू॑नाम् ॥

The Mantra without meters (Sanskrit)

स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः । रथिरायतामुशती पुरंधिरस्मद्र्यगा दावने वसूनाम् ॥

The Mantra's transliteration in English

sa no devebhiḥ pavamāna radendo rayim aśvinaṁ vāvaśānaḥ | rathirāyatām uśatī puraṁdhir asmadryag ā dāvane vasūnām ||

The Pada Paath (Sanskrit)

सः । न॒ः । दे॒वेभिः॑ । प॒व॒मा॒न॒ । र॒द॒ । इन्दो॒ इति॑ । र॒यिम् । अ॒श्विन॑म् । वा॒व॒शा॒नः । र॒थि॒रा॒यता॑म् । उ॒श॒ती । पु॒र॑म्ऽधिः । अ॒स्म॒द्र्य॑क् । आ । दा॒वने॑ । वसू॑नाम् ॥

The Pada Paath - transliteration

saḥ | naḥ | devebhiḥ | pavamāna | rada | indo iti | rayim | aśvinam | vāvaśānaḥ | rathirāyatām | uśatī | puram-dhiḥ | asmadryak | ā | dāvane | vasūnām

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-093/mantra-rig-09-093-005

MANTRA NUMBER:

Mantra 5 of Sukta 93 of Mandal 9 of Rig Veda
Mantra 5 of Varga 3 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 95 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- नोधाः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नू नो॑ र॒यिमुप॑ मास्व नृ॒वन्तं॑ पुना॒नो वा॒ताप्यं॑ वि॒श्वश्च॑न्द्रम् । प्र व॑न्दि॒तुरि॑न्दो ता॒र्यायु॑: प्रा॒तर्म॒क्षू धि॒याव॑सु॒र्जगम्यात् ॥

The Mantra without meters (Sanskrit)

नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् । प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

The Mantra's transliteration in English

nū no rayim upa māsva nṛvantam punāno vātāpyaṁ viśvaścandram | pra vanditur indo tāry āyuḥ prātar makṣū dhiyāvasur jagamyāt ||

The Pada Paath (Sanskrit)

नु । नः॒ । र॒यिम् । उप॑ । मा॒स्व॒ । नृ॒ऽवन्त॑म् । पु॒ना॒नः । वा॒ताप्य॑म् । वि॒श्वऽच॑न्द्रम् । प्र । व॒न्दि॒तुः । इ॒न्दो॒ इति॑ । ता॒रि॒ । आयु॑ः । प्रा॒तः । म॒क्षु । धि॒याऽव॑सुः । ज॒ग॒म्या॒त् ॥

The Pada Paath - transliteration

nu | naḥ | rayim | upa | māsva | nṛ-vantam | punānaḥ | vātāpyam | viśva-candram | pra | vandituḥ | indo iti | tāri | āyuḥ | prātaḥ | makṣu | dhiyāvasuḥ | jagamyāt

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-094/mantra-rig-09-094-001

MANTRA NUMBER:

Mantra 1 of Sukta 94 of Mandal 9 of Rig Veda
Mantra 1 of Varga 4 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 96 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः । अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥

The Mantra without meters (Sanskrit)

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः । अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥

The Mantra's transliteration in English

adhi yad asmin vājinīva śubhaḥ spardhante dhiyaḥ sūrye na viśaḥ | apo vṛṇānaḥ pavate kavīyan vrajaṁ na paśuvardhanāya manma ||

The Pada Paath (Sanskrit)

अधि । यत् । अस्मिन् । वाजिनिऽइव । शुभः । स्पर्धन्ते । धियः । सूर्ये । न । विशः । अपः । वृणानः । पवते । कविऽयन् । व्रजम् । न । पशुऽवर्धनाय । मन्म ॥

The Pada Paath - transliteration

adhi | yat | asmin | vājini-iva | śubhaḥ | spardhante | dhiyaḥ | sūrye | na | viśaḥ | apaḥ | vṛṇānaḥ | pavate | kavi-yan | vrajam | na | paśu-vardhanāya | manma

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-094/mantra-rig-09-094-002

MANTRA NUMBER:

Mantra 2 of Sukta 94 of Mandal 9 of Rig Veda
Mantra 2 of Varga 4 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 97 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

द्वि॒ता व्यू॒र्ण्वन्न॒मृत॑स्य॒ धाम॑ स्व॒र्विदे॒ भुव॑नानि प्रथन्त । धिय॑: पिन्वा॒नाः स्वस॑रे॒ न गाव॑ ऋता॒यन्ती॑र॒भि वा॑वश्र॒ इन्दु॑म् ॥

The Mantra without meters (Sanskrit)

द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त । धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् ॥

The Mantra's transliteration in English

dvitā vyūrṇvann amṛtasya dhāma svarvide bhuvanāni prathanta | dhiyaḥ pinvānāḥ svasare na gāva ṛtāyantīr abhi vāvaśra indum ||

The Pada Paath (Sanskrit)

द्विता । वि॒ऽऊ॒र्ण्वन् । अ॒मृत॑स्य । धाम॑ । स्व॒:ऽवि॑दे॑ । भुव॑नानि । प्र॒थ॒न्त॒ । धिय॑: । पि॒न्वा॒नाः । स्वस॑रे । न । गाव॑: । ऋ॒त॒ऽयन्ती॑: । अ॒भि । व॒व॒श्रे॒ । इन्दु॑म् ॥

The Pada Paath - transliteration

dvitā | vi-ūrṇvan | amṛtasya | dhāma | svaḥ-vide | bhuvanāni | prathanta | dhiyaḥ | pinvānāḥ | svasare | na | gāvaḥ | ṛta-yantīḥ | abhi | vavaśre | indum

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-094/mantra-rig-09-094-003

MANTRA NUMBER:

Mantra 3 of Sukta 94 of Mandal 9 of Rig Veda
Mantra 3 of Varga 4 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 98 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॒ यत्क॒विः काव्या॒ भर॑ते॒ शूरो॒ न रथो॒ भुव॑नानि॒ विश्वा॑ । दे॒वेषु॒ यशो॒ मर्ता॑य॒ भूष॒न्दक्षा॑य रा॒यः पु॑रु॒भूषु॒ नव्यः॑ ॥

The Mantra without meters (Sanskrit)

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा । देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥

The Mantra's transliteration in English

pari yat kaviḥ kāvyā bharate śūro na ratho bhuvanāni viśvā | deveṣu yaśo martāya bhūṣan dakṣāya rāyaḥ purubhūṣu navyaḥ ||

The Pada Paath (Sanskrit)

परि॑ । यत् । क॒विः । काव्या॑ । भर॑ते । शूरः॑ । न । रथः॑ । भु॒व॑नानि । विश्वा॑ । दे॒वेषु॑ । यशः॑ । मर्ता॑य । भूष॑न् । दक्षा॑य । रा॒यः । पु॒रु॒ऽभूषु॑ । नव्यः॑ ॥

The Pada Paath - transliteration

pari | yat | kaviḥ | kāvyā | bharate | śūraḥ | na | rathaḥ | bhuvanāni | viśvā | deveṣu | yaśaḥ | martāya | bhūṣan | dakṣāya | rāyaḥ | puru-bhūṣu | navyaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-094/mantra-rig-09-094-004

MANTRA NUMBER:

Mantra 4 of Sukta 94 of Mandal 9 of Rig Veda
Mantra 4 of Varga 4 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 99 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

श्रि॒ये जा॒तः श्रि॒य आ निरि॑याय॒ श्रि॒यं॒ वयो॑ जरि॒तृभ्यो॑ दधाति । श्रि॒यं॒ वसा॑ना अमृ॒त॒त्वमा॑य॒न्भव॑न्ति स॒त्या स॑मि॒था मि॒तद्रौ॑ ॥

The Mantra without meters (Sanskrit)

श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥

The Mantra's transliteration in English

śriye jātaḥ śriya ā nir iyāya śriyaṁ vayo jaritṛbhyo dadhāti | śriyaṁ vasānā amṛtatvam āyan bhavanti satyā samithā mitadrau ||

The Pada Paath (Sanskrit)

श्रि॒ये । जा॒तः । श्रि॒ये । आ । निः । इ॒या॒य॒ । श्रि॒य॑म् । वयः॑ । ज॒रि॒तृऽभ्यः॑ । द॒धा॒ति॒ । श्रि॒य॑म् । वसा॑नाः । अ॒मृ॒त॒ऽत्वम् । आ॒य॒न् । भव॑न्ति । स॒त्या । स॒म्ऽइ॒था । मि॒तऽद्रौ॑ ॥

The Pada Paath - transliteration

śriye | jātaḥ | śriye | ā | niḥ | iyāya | śriyam | vayaḥ | jaritṛ-bhyaḥ | dadhāti | śriyam | vasānāḥ | amṛta-tvam | āyan | bhavanti | satyā | sam-ithā | mita-drau

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-094/mantra-rig-09-094-005

MANTRA NUMBER:

Mantra 5 of Sukta 94 of Mandal 9 of Rig Veda
Mantra 5 of Varga 4 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 100 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒षमू॒र्जम॒भ्य१॒॑र्षाश्वं॒ गामु॒रु ज्योतिः॑ कृणुहि॒ मत्सि॑ दे॒वान् । विश्वा॑नि॒ हि सु॒षहा॒ तानि॒ तुभ्यं॒ पव॑मान॒ बाध॑से सोम॒ शत्रू॑न् ॥

The Mantra without meters (Sanskrit)

इषमूर्जमभ्यर्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान् । विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥

The Mantra's transliteration in English

iṣam ūrjam abhy arṣāśvaṁ gām uru jyotiḥ kṛṇuhi matsi devān | viśvāni hi suṣahā tāni tubhyam pavamāna bādhase soma śatrūn ||

The Pada Paath (Sanskrit)

इ॒षम् । ऊ॒र्जम् । अ॒भि । अ॒र्ष॒ । अश्व॑म् । गाम् । उ॒रु । ज्योतिः॑ । कृ॒णु॒हि॒ । मत्सि॑ । दे॒वान् । विश्वा॑नि । हि । सु॒ऽसहा॑ । तानि॑ । तुभ्य॑म् । पव॑मान । बाध॑से । सो॒म॒ । शत्रू॑न् ॥

The Pada Paath - transliteration

iṣam | ūrjam | abhi | arṣa | aśvam | gām | uru | jyotiḥ | kṛṇuhi | matsi | devān | viśvāni | hi | su-sahā | tāni | tubhyam | pavamāna | bādhase | soma | śatrūn

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-095/mantra-rig-09-095-001

MANTRA NUMBER:

Mantra 1 of Sukta 95 of Mandal 9 of Rig Veda
Mantra 1 of Varga 5 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 101 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

कनि॑क्रन्ति॒ हरि॒रा सृ॒ज्यमा॑नः॒ सीद॒न्वन॑स्य ज॒ठरे॑ पु॒नानः॑ । नृभि॑र्य॒तः कृ॑णुते नि॒र्णिजं॒ गा अतो॑ म॒तीर्ज॑नयत स्व॒धाभिः॑ ॥

The Mantra without meters (Sanskrit)

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः । नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥

The Mantra's transliteration in English

kanikranti harir ā sṛjyamānaḥ sīdan vanasya jaṭhare punānaḥ | nṛbhir yataḥ kṛṇute nirṇijaṁ gā ato matīr janayata svadhābhiḥ ||

The Pada Paath (Sanskrit)

कनि॑क्रन्ति । हरिः॑ । आ । सृ॒ज्यमा॑नः । सीद॑न् । वन॑स्य । ज॒ठरे॑ । पु॒नानः॑ । नृऽभिः॑ । य॒तः । कृ॒णु॒ते । निः॒ऽनिज॑म् । गाः । अतः॑ । म॒तीः । ज॒न॒य॒त॒ । स्व॒धाभिः॑ ॥

The Pada Paath - transliteration

kanikranti | hariḥ | ā | sṛjyamānaḥ | sīdan | vanasya | jaṭhare | punānaḥ | nṛ-bhiḥ | yataḥ | kṛṇute | niḥ-nijam | gāḥ | ataḥ | matīḥ | janayata | svadhābhiḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-095/mantra-rig-09-095-002

MANTRA NUMBER:

Mantra 2 of Sukta 95 of Mandal 9 of Rig Veda
Mantra 2 of Varga 5 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 102 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- संस्तारपङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

हरि॑ः सृजा॒नः प॒थ्या॑मृ॒तस्येय॑र्ति॒ वाच॑मरि॒तेव॒ नाव॑म् । दे॒वो दे॒वानां॒ गुह्या॑नि॒ नामा॒विष्कृ॑णोति ब॒र्हिषि॑ प्र॒वाचे॑ ॥

The Mantra without meters (Sanskrit)

हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् । देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥

The Mantra's transliteration in English

hariḥ sṛjānaḥ pathyām ṛtasyeyarti vācam ariteva nāvam | devo devānāṁ guhyāni nāmāviṣ kṛṇoti barhiṣi pravāce ||

The Pada Paath (Sanskrit)

हरि॑ः । सृ॒जा॒नः । प॒थ्या॑म् । ऋ॒तस्य॑ । इ॒य॑र्ति । वाच॑म् । अ॒रि॒ताऽइ॑व । नाव॑म् । दे॒वः । दे॒वाना॑म् । गुह्या॑नि । नाम॑ । आ॒विः । कृ॒णो॒ति॒ । ब॒र्हिषि॑ । प्र॒ऽवाचे॑ ॥

The Pada Paath - transliteration

hariḥ | sṛjānaḥ | pathyām | ṛtasya | iyarti | vācam | aritā-iva | nāvam | devaḥ | devānām | guhyāni | nāma | āviḥ | kṛṇoti | barhiṣi | pra-vāce

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-095/mantra-rig-09-095-003

MANTRA NUMBER:

Mantra 3 of Sukta 95 of Mandal 9 of Rig Veda
Mantra 3 of Varga 5 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 103 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ । नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥

The Mantra without meters (Sanskrit)

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ । नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥

The Mantra's transliteration in English

apām ived ūrmayas tarturāṇāḥ pra manīṣā īrate somam accha | namasyantīr upa ca yanti saṁ cā ca viśanty uśatīr uśantam ||

The Pada Paath (Sanskrit)

अपाम्ऽइव । इत् । ऊर्मयः । तर्तुराणाः । प्र । मनीषाः । ईरते । सोमम् । अच्छ । नमस्यन्तीः । उप । च । यन्ति । सम् । च । आ । च । विशन्ति । उशतीः । उशन्तम् ॥

The Pada Paath - transliteration

apām-iva | it | ūrmayaḥ | tarturāṇāḥ | pra | manīṣāḥ | īrate | somam | accha | namasyantīḥ | upa | ca | yanti | sam | ca | ā | ca | viśanti | uśatīḥ | uśantam

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-095/mantra-rig-09-095-004

MANTRA NUMBER:

Mantra 4 of Sukta 95 of Mandal 9 of Rig Veda
Mantra 4 of Varga 5 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 104 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तं म॑र्मृ॒जानं॑ महि॒षं न सानां॑वं॒शुं दु॑हन्त्यु॒क्षणं॑ गिरि॒ष्ठाम् । तं वा॑वशा॒नं म॒तय॑: सचन्ते त्रि॒तो बि॑भर्ति॒ वरु॑णं समु॒द्रे ॥

The Mantra without meters (Sanskrit)

तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् । तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥

The Mantra's transliteration in English

tam marmṛjānam mahiṣaṁ na sānāv aṁśuṁ duhanty ukṣaṇaṁ giriṣṭhām | taṁ vāvaśānam matayaḥ sacante trito bibharti varuṇaṁ samudre ||

The Pada Paath (Sanskrit)

तम् । म॒र्मृ॒जा॒नम् । म॒हि॒षम् । न । सानौ॑ । अं॒शुम् । दु॒ह॒न्ति॒ । उ॒क्षण॑म् । गि॒रि॒ऽस्थाम् । तम् । वा॒व॒शा॒नम् । म॒तय॑: । स॒च॒न्ते॒ । त्रि॒तः । बि॒भ॒र्ति॒ । वरु॑णम् । स॒मु॒द्रे ॥

The Pada Paath - transliteration

tam | marmṛjānam | mahiṣam | na | sānau | aṃśum | duhanti | ukṣaṇam | giri-sthām | tam | vāvaśānam | matayaḥ | sacante | tritaḥ | bibharti | varuṇam | samudre

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-095/mantra-rig-09-095-005

MANTRA NUMBER:

Mantra 5 of Sukta 95 of Mandal 9 of Rig Veda
Mantra 5 of Varga 5 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 105 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- प्रस्कण्वः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् । इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥

The Mantra without meters (Sanskrit)

इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् । इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥

The Mantra's transliteration in English

iṣyan vācam upavakteva hotuḥ punāna indo vi ṣyā manīṣām | indraś ca yat kṣayathaḥ saubhagāya suvīryasya patayaḥ syāma ||

The Pada Paath (Sanskrit)

इष्यन् । वाचम् । उपवक्ताऽइव । होतुः । पुनानः । इन्दो इति । वि । स्य । मनीषाम् । इन्द्रः । च । यत् । क्षयथः । सौभगाय । सुऽवीर्यस्य । पतयः । स्याम ॥

The Pada Paath - transliteration

iṣyan | vācam | upavaktā-iva | hotuḥ | punānaḥ | indo iti | vi | sya | manīṣām | indraḥ | ca | yat | kṣayathaḥ | saubhagāya | su-vīryasya | patayaḥ | syāma

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-001

MANTRA NUMBER:
Mantra 1 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 1 of Varga 6 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 106 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना । भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥

The Mantra without meters (Sanskrit)

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना । भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥

The Mantra's transliteration in English

pra senānīḥ śūro agre rathānāṁ gavyann eti harṣate asya senā | bhadrān kṛṇvann indrahavān sakhibhya ā somo vastrā rabhasāni datte ||

The Pada Paath (Sanskrit)

प्र । सेनाऽनीः । शूरः । अग्रे । रथानाम् । गव्यन् । एति । हर्षते । अस्य । सेना । भद्रान् । कृण्वन् । इन्द्रऽहवान् । सखिऽभ्यः । आ । सोमः । वस्त्रा । रभसानि । दत्ते ॥

The Pada Paath - transliteration

pra | senānīḥ | śūraḥ | agre | rathānām | gavyan | eti | harṣate | asya | senā | bhadrān | kṛṇvan | indra-havān | sakhi-bhyaḥ | ā | somaḥ | vastrā | rabhasāni | datte

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-002

MANTRA NUMBER:

Mantra 2 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 2 of Varga 6 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 107 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः । आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥

The Mantra without meters (Sanskrit)

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः । आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥

The Mantra's transliteration in English

sam asya hariṁ harayo mṛjanty aśvahayair aniśitaṁ namobhiḥ | ā tiṣṭhati ratham indrasya sakhā vidvām̐ enā sumatiṁ yāty accha ||

The Pada Paath (Sanskrit)

सम् । अस्य । हरिम् । हरयः । मृजन्ति । अश्वऽहयैः । अनिऽशितम् । नमःऽभिः । आ । तिष्ठति । रथम् । इन्द्रस्य । सखा । विद्वान् । एन । सुऽमतिम् । याति । अच्छ ॥

The Pada Paath - transliteration

sam | asya | harim | harayaḥ | mṛjanti | aśva-hayaiḥ | asni-śitam | namaḥ-bhiḥ | ā | tiṣṭhati | ratham | indrasya | sakhā | vidvān | ena | su-matim | yāti | accha

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-003

MANTRA NUMBER:

Mantra 3 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 3 of Varga 6 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 108 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स नो॑ देव दे॒वता॑ते पवस्व म॒हे सो॑म॒ प्सर॑स इन्द्र॒पानः॑ । कृ॒ण्वन्न॒पो व॒र्षय॒न्द्याम॒ुतेमाम॒ुरोरा नो॑ वरिवस्या पु॒ना॒नः ॥

The Mantra without meters (Sanskrit)

स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः । कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥

The Mantra's transliteration in English

sa no deva devatāte pavasva mahe soma psarasa indrapānaḥ | kṛṇvann apo varṣayan dyām utemām uror ā no varivasyā punānaḥ ||

The Pada Paath (Sanskrit)

सः । नः॒ । दे॒व॒ । दे॒वऽता॑ते । प॒व॒स्व॒ । म॒हे । सो॒म॒ । प्सर॑से । इ॒न्द्र॒ऽपानः॑ । कृ॒ण्वन् । अ॒पः । व॒र्षय॑न् । द्याम् । उ॒त । इ॒माम् । उ॒रोः । आ । नः॒ । व॒रि॒व॒स्य॒ । पु॒ना॒नः ॥

The Pada Paath - transliteration

saḥ | naḥ | deva | deva-tāte | pavasva | mahe | soma | psarase | indra-pānaḥ | kṛṇvan | apaḥ | varṣayan | dyām | uta | imām | uroḥ | ā | naḥ | varivasya | punānaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-004

MANTRA NUMBER:

Mantra 4 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 4 of Varga 6 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 109 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते । तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥

The Mantra without meters (Sanskrit)

अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते । तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥

The Mantra's transliteration in English

ajītaye 'hataye pavasva svastaye sarvatātaye bṛhate | tad uśanti viśva ime sakhāyas tad ahaṁ vaśmi pavamāna soma ||

The Pada Paath (Sanskrit)

अजीतये । अहतये । पवस्व । स्वस्तये । सर्वऽतातये । बृहते । तत् । उशन्ति । विश्वे । इमे । सखायः । तत् । अहम् । वश्मि । पवमान । सोम ॥

The Pada Paath - transliteration

ajītaye | ahataye | pavasva | svastaye | sarva-tātaye | bṛhate | tat | uśanti | viśve | ime | sakhāyaḥ | tat | aham | vaśmi | pavamāna | soma

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-005

MANTRA NUMBER:

Mantra 5 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 5 of Varga 6 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 110 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सोमः॑ पवते जनि॒ता म॑ती॒नां ज॑नि॒ता दि॒वो ज॑नि॒ता पृ॑थि॒व्याः । ज॒नि॒ताग्नेर्ज॑नि॒ता सूर्य॑स्य जनि॒तेन्द्र॑स्य जनि॒तोत विष्णोः॑ ॥

The Mantra without meters (Sanskrit)

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः । जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥

The Mantra's transliteration in English

somaḥ pavate janitā matīnāṁ janitā divo janitā pṛthivyāḥ | janitāgner janitā sūryasya janitendrasya janitota viṣṇoḥ ||

The Pada Paath (Sanskrit)

सोमः॑ । प॒व॒ते॒ । ज॒नि॒ता । म॒ती॒नाम् । ज॒नि॒ता । दि॒वः । ज॒नि॒ता । पृ॒थि॒व्याः । ज॒नि॒ता । अ॒ग्नेः । ज॒नि॒ता । सूर्य॑स्य । ज॒नि॒ता । इन्द्र॑स्य । ज॒नि॒ता । उ॒त । विष्णोः॑ ॥

The Pada Paath - transliteration

somaḥ | pavate | janitā | matīnām | janitā | divaḥ | janitā | pṛthivyāḥ | janitā | agneḥ | janitā | sūryasya | janitā | indrasya | janitā | uta | viṣṇoḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-006

MANTRA NUMBER:
Mantra 6 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 1 of Varga 7 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 111 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ब्र॒ह्मा दे॒वानां॑ पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा॑म् । श्ये॒नो गृध्रा॑णां॒ स्वधि॑ति॒र्वना॑नां॒ सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभ॑न् ॥

The Mantra without meters (Sanskrit)

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥

The Mantra's transliteration in English

brahmā devānām padavīḥ kavīnām ṛṣir viprāṇām mahiṣo mṛgāṇām | śyeno gṛdhrāṇāṁ svadhitir vanānāṁ somaḥ pavitram aty eti rebhan ||

The Pada Paath (Sanskrit)

ब्र॒ह्मा । दे॒वाना॑म् । प॒द॒ऽवीः । क॒वी॒नाम् । ऋषि॑ः । विप्रा॑णाम् । म॒हि॒षः । मृ॒गाणा॑म् । श्ये॒नः । गृध्रा॑णाम् । स्वऽधि॑तिः । वना॑नाम् । सोम॑ः । प॒वित्र॑म् । अति॑ । ए॒ति॒ । रेभ॑न् ॥

The Pada Paath - transliteration

brahmā | devānām | pada-vīḥ | kavīnām | ṛṣiḥ | viprāṇām | mahiṣaḥ | mṛgāṇām | śyenaḥ | gṛdhrāṇām | sva-dhitiḥ | vanānām | somaḥ | pavitram | ati | eti | rebhan

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-007

MANTRA NUMBER:

Mantra 7 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 2 of Varga 7 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 112 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्रावी॑विपद्वा॒च ऊ॒र्मिं न सिन्धु॒र्गिर॒: सोम॒: पव॑मानो मनी॒षाः । अ॒न्तः पश्य॑न्वृ॒जने॒माव॑रा॒ण्या ति॑ष्ठति वृष॒भो गोषु॑ जा॒नन् ॥

The Mantra without meters (Sanskrit)

प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः । अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥

The Mantra's transliteration in English

prāvīvipad vāca ūrmiṁ na sindhur giraḥ somaḥ pavamāno manīṣāḥ | antaḥ paśyan vṛjanemāvarāṇy ā tiṣṭhati vṛṣabho goṣu jānan ||

The Pada Paath (Sanskrit)

प्र । अ॒वी॒वि॒प॒त् । वा॒चः । ऊ॒र्मिम् । न । सिन्धुः॑ । गिरः॑ । सोमः॑ । पव॑मानः । म॒नी॒षाः । अ॒न्तरिति॑ । पश्य॑न् । वृ॒जना॑ । इ॒मा । अव॑राणि । आ । ति॒ष्ठ॒ति॒ । वृ॒ष॒भः । गोषु॑ । जा॒नन् ॥

The Pada Paath - transliteration

pra | avīvipat | vācaḥ | ūrmim | na | sindhuḥ | giraḥ | somaḥ | pavamānaḥ | manīṣāḥ | antariti | paśyan | vṛjanā | imā | avarāṇi | ā | tiṣṭhati | vṛṣabhaḥ | goṣu | jānan

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-008

MANTRA NUMBER:

Mantra 8 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 3 of Varga 7 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 113 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स म॒त्स॒रः पृ॒त्सु व॒न्वन्नवा॑तः स॒हस्र॑रेता अ॒भि वाज॑मर्ष । इन्द्रा॑येन्दो॒ पव॑मानो मनी॒ष्यं१॒॑शोरू॒र्मिमी॑रय॒ गा इ॒षण्यन् ॥

The Mantra without meters (Sanskrit)

स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष । इन्द्रायेन्दो पवमानो मनीष्यंशोरूर्मिमीरय गा इषण्यन् ॥

The Mantra's transliteration in English

sa matsaraḥ pṛtsu vanvann avātaḥ sahasraretā abhi vājam arṣa | indrāyendo pavamāno manīṣy aṁśor ūrmim īraya gā iṣaṇyan ||

The Pada Paath (Sanskrit)

सः । म॒त्स॒रः । पृ॒त्ऽसु । व॒न्वन् । अवा॑तः । स॒हस्र॑ऽरेताः । अ॒भि । वाज॑म् । अ॒र्ष॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । पव॑मानः । म॒नी॒षी । अं॒शोः । ऊ॒र्मिम् । ई॒र॒य॒ । गाः । इ॒षण्यन् ॥

The Pada Paath - transliteration

saḥ | matsaraḥ | pṛt-su | vanvan | avātaḥ | sahasra-retāḥ | abhi | vājam | arṣa | indrāya | indo iti | pavamānaḥ | manīṣī | aṃśoḥ | ūrmim | īraya | gāḥ | iṣaṇyan

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-009

MANTRA NUMBER:

Mantra 9 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 4 of Varga 7 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 114 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॑ प्रि॒यः क॒लशे॑ दे॒ववा॑त॒ इन्द्रा॑य॒ सोमो॒ रण्यो॒ मदा॑य । स॒हस्र॑धारः श॒तवा॑ज॒ इन्दु॑र्वा॒जी न सप्ति॒ः सम॑ना जिगाति ॥

The Mantra without meters (Sanskrit)

परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय । सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ॥

The Mantra's transliteration in English

pari priyaḥ kalaśe devavāta indrāya somo raṇyo madāya | sahasradhāraḥ śatavāja indur vājī na saptiḥ samanā jigāti ||

The Pada Paath (Sanskrit)

परि॑ । प्रि॒यः । क॒लशे॑ । दे॒वऽवा॑तः । इन्द्रा॑य । सोमः॑ । रण्यः॑ । मदा॑य । स॒हस्र॑ऽधारः । श॒तऽवा॑जः । इन्दुः॑ । वा॒जी । न । सप्तिः॑ । सम॑ना । जि॒गा॒ति॒ ॥

The Pada Paath - transliteration

pari | priyaḥ | kalaśe | deva-vātaḥ | indrāya | somaḥ | raṇyaḥ | madāya | sahasra-dhāraḥ | śata-vājaḥ | induḥ | vājī | na | saptiḥ | samanā | jigāti

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-010

MANTRA NUMBER:

Mantra 10 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 5 of Varga 7 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 115 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स पू॒र्व्यो व॑सु॒विज्जाय॑मानो मृजा॒नो अ॒प्सु दु॑दुहा॒नो अद्रौ॑ । अ॒भि॒श॒स्ति॒पा भु॒व॑नस्य॒ राजा॑ वि॒दद्गा॒तुं ब्रह्म॑णे पू॒यमा॑नः ॥

The Mantra without meters (Sanskrit)

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ । अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥

The Mantra's transliteration in English

sa pūrvyo vasuvij jāyamāno mṛjāno apsu duduhāno adrau | abhiśastipā bhuvanasya rājā vidad gātum brahmaṇe pūyamānaḥ ||

The Pada Paath (Sanskrit)

सः । पू॒र्व्यः । व॒सु॒ऽवित् । जाय॑मानः । मृ॒जा॒नः । अ॒प्ऽसु । दु॒दु॒हा॒नः । अद्रौ॑ । अ॒भि॒श॒स्ति॒ऽपाः । भु॒व॑नस्य । राजा॑ । वि॒दत् । गा॒तुम् । ब्रह्म॑णे । पू॒यमा॑नः ॥

The Pada Paath - transliteration

saḥ | pūrvyaḥ | vasu-vit | jāyamānaḥ | mṛjānaḥ | ap-su | duduhānaḥ | adrau | abhiśasti-pāḥ | bhuvanasya | rājā | vidat | gātum | brahmaṇe | pūyamānaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-011

MANTRA NUMBER:

Mantra 11 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 1 of Varga 8 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 116 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्दः (Chhand) :- त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वया॒ हि नः॑ पि॒तरः॑ सोम॒ पूर्वे॒ कर्मा॑णि च॒क्रुः प॑वमान॒ धीराः॑ । व॒न्वन्नवा॑तः परि॒धीँरपो॑र्णु वी॒रेभि॒रश्वै॑र्म॒घवा॑ भवा नः ॥

The Mantra without meters (Sanskrit)

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥

The Mantra's transliteration in English

tvayā hi naḥ pitaraḥ soma pūrve karmāṇi cakruḥ pavamāna dhīrāḥ | vanvann avātaḥ paridhīm̐r aporṇu vīrebhir aśvair maghavā bhavā naḥ ||

The Pada Paath (Sanskrit)

त्वया॑ । हि । नः॒ । पि॒तरः॑ । सो॒म॒ । पूर्वे॑ । कर्मा॑णि । च॒क्रुः । प॒व॒मा॒न॒ । धीराः॑ । व॒न्वन् । अवा॑तः । प॒रि॒ऽधीन् । अप॑ । ऊ॒र्णु॒ । वी॒रेऽभिः । अश्वैः॑ । म॒घऽवा॑ । भ॒व॒ । नः॒ ॥

The Pada Paath - transliteration

tvayā | hi | naḥ | pitaraḥ | soma | pūrve | karmāṇi | cakruḥ | pavamāna | dhīrāḥ | vanvan | avātaḥ | pari-dhīn | apa | ūrṇu | vīre-bhiḥ | aśvaiḥ | magha-vā | bhava | naḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-012

MANTRA NUMBER:

Mantra 12 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 2 of Varga 8 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 117 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् । एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥

The Mantra without meters (Sanskrit)

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् । एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥

The Mantra's transliteration in English

yathāpavathā manave vayodhā amitrahā varivovid dhaviṣmān | evā pavasva draviṇaṁ dadhāna indre saṁ tiṣṭha janayāyudhāni ||

The Pada Paath (Sanskrit)

यथा । अपवथाः । मनवे । वयःऽधाः । अमित्रऽहा । वरिवःऽवित् । हविष्मान् । एव । पवस्व । द्रविणम् । दधानः । इन्द्रे । सम् । तिष्ठ । जनय । आयुधानि ॥

The Pada Paath - transliteration

yathā | apavathāḥ | manave | vayaḥ-dhāḥ | amitra-hā | varivaḥ-vit | haviṣmān | eva | pavasva | draviṇam | dadhānaḥ | indre | sam | tiṣṭha | janaya | āyudhāni

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-013

MANTRA NUMBER:

Mantra 13 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 3 of Varga 8 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 118 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये । अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥

The Mantra without meters (Sanskrit)

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये । अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥

The Mantra's transliteration in English

pavasva soma madhumām̐ ṛtāvāpo vasāno adhi sāno avye | ava droṇāni ghṛtavānti sīda madintamo matsara indrapānaḥ ||

The Pada Paath (Sanskrit)

पवस्व । सोम । मधुऽमान् । ऋतऽवा । अपः । वसानः । अधि । सानौ । अव्ये । अव । द्रोणानि । घृतऽवन्ति । सीद । मदिन्ऽतमः । मत्सरः । इन्द्रऽपानः ॥

The Pada Paath - transliteration

pavasva | soma | madhu-mān | ṛta-vā | apaḥ | vasānaḥ | adhi | sānau | avye | ava | droṇāni | ghṛta-vanti | sīda | madin-tamaḥ | matsaraḥ | indra-pānaḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-014

MANTRA NUMBER:

Mantra 14 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 4 of Varga 8 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 119 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वृ॒ष्टिं दि॒वः श॒तधा॑रः पवस्व सहस्र॒सा वा॑ज॒युर्दे॒ववी॑तौ । सं सिन्धु॑भिः क॒लशे॑ वावशा॒नः समु॒स्रिया॑भिः प्रति॒रन्न॒ आयुः॑ ॥

The Mantra without meters (Sanskrit)

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ । सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥

The Mantra's transliteration in English

vṛṣṭiṁ divaḥ śatadhāraḥ pavasva sahasrasā vājayur devavītau | saṁ sindhubhiḥ kalaśe vāvaśānaḥ sam usriyābhiḥ pratiran na āyuḥ ||

The Pada Paath (Sanskrit)

वृ॒ष्टिम् । दि॒वः । श॒तऽधा॑रः । प॒व॒स्व॒ । स॒ह॒स्र॒ऽसाः । वा॒ज॒ऽयुः । दे॒वऽवी॑तौ । सम् । सिन्धु॑ऽभिः । क॒लशे॑ । वा॒व॒शा॒नः । सम् । उ॒स्रिया॑भिः । प्र॒ऽति॒र॑न् । नः॒ । आयुः॑ ॥

The Pada Paath - transliteration

vṛṣṭim | divaḥ | śata-dhāraḥ | pavasva | sahasra-sāḥ | vāja-yuḥ | deva-vītau | sam | sindhu-bhiḥ | kalaśe | vāvaśānaḥ | sam | usriyābhiḥ | pra-tiran | naḥ | āyuḥ

Link: www.vedakosh.com/rig-veda/mandal-9/sukta-096/mantra-rig-09-096-015

MANTRA NUMBER:

Mantra 15 of Sukta 96 of Mandal 9 of Rig Veda
Mantra 5 of Varga 8 of Adhyaya 4 of Ashtak 7 of Rig Veda
Mantra 120 of Anuvaak 5 of Mandal 9 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रतर्दनो दैवोदासिः

देवता (Devataa) :- पवमानः सोमः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

एष स्य सोमो॑ म॒तिभि॑: पुना॒नोऽत्यो॒ न वा॒जी तर॒तीदरा॑तीः । पयो॒ न दु॒ग्धमदि॑तेरिषि॒रमु॒र्वि॑व गा॒तुः सु॒यमो॒ न वोळ्हा॑ ॥

The Mantra without meters (Sanskrit)

एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः । पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥

The Mantra's transliteration in English

eṣa sya somo matibhiḥ punāno 'tyo na vājī taratīd arātīḥ | payo na dugdham aditer iṣiram urv iva gātuḥ suyamo na volhā ||

The Pada Paath (Sanskrit)

